No. ४३९०

Title सांख्य तत्व कौमुदी

Author श्री वाचस्पति मिश्रः

Extent ३० Age x

Subject सांख्यं

सांख्यतत्त्वकौमुदी

पत्र ५०

4390

सांख्यकौमुदी

४८



श्रीगणेशाय नमः। अनादिनाथाय नमः। ॐ॥ अजामेकां लोहितशुक्लकृष्णां बह्वीः प्रजाः सृजमानां नमामः। अजा ये तां जुषमाणां भजंते ज
हत्येनां भुक्तभोगां नुमस्तान्॥ कपिलाय महामुनये शिष्याय तस्य चासुरये। पंचशिखाय तथेश्वरकृष्णायैते नमः स्यामः॥ इह खलु प्र
तिपित्सितमर्थं प्रतिपादयन् प्रतिपादयितावधेयवचनो भवति प्रेक्षावतां। अप्रतिपित्सितमर्थं तु प्रतिपादयन्नायं लौकिको न परीक्षक इ
ति प्रेक्षावद्भिरुन्मत्तवदुपेक्षणीयः स्यात्। स चैषां प्रतिपित्सितोऽर्थो यो ज्ञातः सन् परमपुरुषार्थाय कल्पत इति प्रारिप्सितशास्त्रविषय
ज्ञानस्य परमपुरुषार्थसाधनहेतुत्वात्तद्विषयजिज्ञासामवतारयति। दुःखत्रयाभिघाताज्जिज्ञासा तदभिघातके हेतौ दृष्टे सा यो
पार्था चेन्नैकांतात्यंततोऽभावात्। एवं हि न शास्त्रविषयो जिज्ञास्येत यदि दुःखं नाम जगति न स्यात् सद्वा न जिहासितं जिहासितं स्यात्
वा अशक्यं समुच्छेदं। अशक्यसमुच्छेदता च द्वेधा। दुःखस्य नित्यत्वाद्वा तदुच्छेदोपायापरिज्ञानाद्वा। शक्यसमुच्छेदत्वेपि च। शा
वि स्त्रविषयज्ञानस्यानुपायत्वाद्वा। सुकरोपायांतरस्य सद्भावाद्वा स्यात्। तत्र न तावद्दुःखं नास्ति नाप्यजिहासितमित्युक्तं दुःखत्रया
भिघातादिति। दुःखानां त्रयं दुःखत्रयं। तत्खल्वाध्यात्मिकं आधिभौतिकमाधिदैविकं चेति। तत्राऽध्यात्मिकं द्विविधं। शारीरं
मानसं च। शारीरं वातपित्तश्लेष्मणां वैषम्यनिमित्तं। मानसं काम-क्रोध-लोभ-मोह-भय-ईर्ष्या-विषाद-विषयविशेषादर्शन
निबंधनं। सर्वं चैतदांतरोपायसाध्यत्वादाध्यात्मिकं दुःखं। बाह्योपायसाध्यं दुःखं द्वेधा। आधिभौतिकमाधिदैविकं च।
तत्राधिभौतिकं मानुषपशुमृगपक्षिसरीसृपस्थावरनिमित्तं आधिदैविकं यक्षराक्षसविनायकग्रहाद्यावेशनिबंध सं.क

धनं।तदेतत्प्रत्यात्मवेदनीयं दुःखं रजःपरिणामभेदो न शक्यं प्रत्याख्यातुं।तदनेन दुःखत्रयेणांतःकरणवर्त्तिना प्रतिकूलवेदनीय
तया चेतनाशक्तेरभिसंबंधोभिघातः।एतावता प्रतिकूलवेदनीयत्वं जिहासाहेतुरुक्तः।यद्यपि सन्निरुध्यते दुःखं तथापि तदभि
भवः शक्यः कर्तुमित्युपरिष्टादुपपादयिष्यते।तथा चोपघ्नन्ते तदपघातके हेताविति।तस्य दुःखत्रयस्यापघातकस्तदपघा
तकः।उपसर्जनस्यापि बुध्यानिःरूप्य तदा परामर्शः।तदपघातकश्च हेतुः शास्त्रव्युत्पाद्यो नान्य इत्याशयः।तत्र शंकते दृष्टे सा
पार्थ्ये चेत्।अयमर्थः।अस्तु दुःखत्रयं जिहासितं च तद्भवतु।भवतु च तच्छक्यहानं।सहतां च शास्त्रगम्यस्तदुपायस्तदुच्छेत्तुं तथाप्य
त्र जिहासा प्रेक्षावतामयुक्ता।दृष्टस्यैवोपायस्य तदुच्छेदकस्य सुकरस्य विद्यमानत्वात्।तत्त्वज्ञानस्य तु अनेकजन्माभ्यासपरंपरा
ससाध्यतयातिदुष्करत्वात्।तथा च लौकिका नामाभाणकः।अर्के चेन्मधु विंदेत किमर्थं पर्वतं व्रजेत्।इष्टस्यार्थस्य संप्राप्तौ को वि के
द्वान्यत्नं समाचरेत् इति।संति चोपायाः शतशः शारीरदुःखप्रतीकारायेषत्करा भिषजां वरैरुपदिष्टाः।मानसस्यापि तापस्य प्रतीकारा
य मनोज्ञस्त्रीपानभोजनविलेपनवस्त्रालंकारादिविषयसंप्राप्तिरुपाय ईषत्करः।एवमाधिभौतिकस्यापि दुःखस्य नीतिशा
स्त्राभ्यासकुशलतानिरत्ययस्थानाध्यासनादिः प्रतीकारहेतुरीषत्करः।तथाधिदैविकस्य दुःखस्य मणिमंत्राद्युपयोगः सुक पा
रः प्रतीकारोपाय इति।निराकरोति नेति।कुतः एकांतात्यंततोऽभावात्।एकांतो दुःखनिवृत्तेरवश्यंभावः।अत्यंतो दुःखस्य
निवृत्तस्य पुनरनुत्पादः।तयोरेकांतात्यंतयोरभावः एकांतात्यंततोऽभाव इति षष्ठीद्विवचनस्थाने सार्वविभक्तिकस्तसिः।
एतदुक्तं भवति।यथाविधि रसायनकामिनीनीतिशास्त्राभ्यासमंत्राद्युपयोगेऽपि तस्य तस्याध्यात्मिकादेर्दुःखस्य निवृत्तेरदर्शना

रा॰म
सां-दि
२
न

दत्वैकान्तिकत्वं। निरुक्तस्यापि पुनरुत्पत्तिदर्शनादात्यन्तिकत्वमिति। अतः सुकरोपायो ... ऐकान्तिकात्यन्तिकदुःखानिवर्तनेनेष्टउपा
य इति नापार्थो जिज्ञासेति सर्वथा। यद्यपि दुःखममंग ×लं× लं। तथापि न सरिहार्यत्वेन नतदुपघातो मंगलत्वे विद्युक्तं। शास्त्रादे
नत्कीर्तनं स्यादेव मा भूत दृष्टउपायो वैदिकस्तु ज्योतिष्टोमादिः सहस्रसंवत्सरपर्यंतः कर्मकलापः तापत्रयमेकांतमत्यंतं चापने
ष्यतिश्रूयते हि स्वर्गकामो यजेतेति। स्वर्गश्च यन्न दुःखेन संभिन्नं न च ग्रस्तमनंतरं। अभिलाषोपनीतं च तत्सुखं स्वःपदास्पदमिति।
दुःखविरोधी सुखविशेषः स्वर्गः। स च स्वसत्तया समूलघातमपहंति दुःखं। न चैष क्षयी। तथा हि श्रूयते अपाम सोमममृता अ
भूमेति। तत्क्षयो कुतोऽस्याऽमृतत्वसंभवः। तस्माद्वैदिकस्य तापत्रयप्रतीकारहेतोर्मुहूर्तयामाऽहोरात्रमाससंवत्सरादिनि
र्वर्तनीयस्यानेकजन्मपरंपरायाससंपादनीयाद्विवेकज्ञानादीषत्करत्वात्पुनरप्यपार्था जिज्ञासेत्याशंक्याह। दृष्टवदानुश्र
विकः स ह्यविशुद्धिक्षयातिशययुक्तः। तद्विपरीतः श्रेयान् व्यक्ताव्यक्तज्ञविज्ञानात्। गुरुपाठादनुश्रूयत इत्यनुश्रवो वेदः।
एतदुक्तं भवति। श्रूयत एव परं न केनापि क्रियत इति। तत्र भव आनुश्रविकस्तत्र प्राप्तो ज्ञात इति यावत्। आनुश्रविकोऽपि कर्मका
र्लापो दृष्टेन तुल्यो वर्तत इति। ऐकान्तिकात्यंतदुःखप्रतीकारानुपायत्वस्योभयत्रापि तुल्यत्वात्। यद्यपि चानुश्रविक इति सामान्याभि
वा धानं तथापि कर्मकलापाभिप्रायं द्रष्टव्यं। विवेकज्ञानस्याप्यानुश्रविकत्वात्। तथा चानुश्रूयते। आत्मा वा अरे ज्ञातव्यः प्रकृतितो विवे
क्तव्यः। स न पुनरावर्तते न स पुनरावर्तत इति। अस्यां प्रतिज्ञायां हेतुमाह। स ह्यविशुद्धियोक्तेति शायर्थं श्रेयेभवद्दिति। स्वल्पः
संस्कारो ज्योतिष्टोमादिजन्मनः प्रधानापूर्वस्यापकारकैर्हिंसादिजन्मनः ... पूर्वेण। सपरिहारः सा ×वं× त्रैयाहिकियता

पुरः अविशुद्धिः सोमादियागस्य पशुबीजादिवधसाधनता। यथाह स्म भगवान्पंचशिखाचार्यः स्वल्पः संक २

पि प्रायश्चित्तेन परिहर्तुं। अथ प्रमादतः प्रायश्चित्तमपि नाचरितं प्रधानकर्मविपाकसमये स च विपच्यते तथापि यावदसावनर्थं प्रसूते
तावत्सप्रत्यवमर्षाः। स्पष्टते पुण्यसंभारोपनीतेसुखसुधाहृदावगाहिनः कुशलाः पापमात्रोपपादितां दुःखवह्निकणिकां प्रस
वमर्षेण सहिष्णवस्तया सह वर्तन्त इति सप्रत्यवमर्षाः। न च न हिंस्यात्सर्वा भूतानीति सामान्यशास्त्रं विशेषशास्त्रेणाग्नीषोमी
यं पशुमालभेतेत्यनेन बाध्यत इति युक्तं। विरोधाभावात्। विरोधे हि बलीयसा दुर्बलं बाध्यते न चेहास्ति विरोधोऽभिन्नविष
यत्वात्। तथा हि। न हिंस्यादिति निषेधेन हिंसायाः अनर्थहेतुभावो ज्ञाप्यते न त्वक्रत्वर्थत्वमपि। न चानर्थहेतुत्वक्रतूपका
रकत्वयोः कश्चिद्विरोधोऽस्ति सा हि पुरुषस्य दोषमावक्ष्यति क्रतोश्चोपकरिष्यतीति। क्षयातिशयौ फलगतावुपाये उपचरि
तौ। क्षयित्वं च स्वर्गादेः सत्त्वे सति कार्यत्वादनुमितं ज्योतिष्टोमादयः स्वर्गमात्रस्य साधनं वाजपेयादयस्तु स्वाराज्यस्येत्यतिशययुक्त प
त्वं। परसंपदुत्कर्षो हि हीनसंपदं पुरुषं दुःखाकरोति। अपाम सोममममृता अभूमेति चामृतत्वाभिधानं चिरस्थानमुपलक्षयति। यदा
हुः। आभूतसंप्लवं स्थानममृतत्वं हि भाष्यत इति। अत एव च श्रुतिः। न कर्मणा न प्रजया धनेन त्यागेनैके नाऽमृतत्वमानशुः। परेण
नाकं निहितं गुहायां विभ्राजदेतद्यतयो विशन्ति तथा। कर्मणा मृत्युमृषयो निषेदुः प्रजावन्तो द्रविणमीहमानाः। तथापरे ऋषयो मनी
षिणः परं कर्मभ्योऽमृतत्वमानशुरिति। तदेतत्सर्वमभिप्रेत्याह। तद्विपरीतः श्रेयान् व्यक्ताव्यक्तज्ञविज्ञानात्। तस्मादानुश्रविकात्
दुःखप्रतिघातकोपायात्सोमपानादेरविशुद्धादनित्यसातिशयफलात् तद्विपरीतो विशुद्धो हिंसादिसंकराभावात् नित्यनिरतिशा

२

यफलोऽस्वर्गादपुनरावृत्तिश्रुतेः। न च कार्यत्वेनानित्यता फलस्य दुःखाभावरूपस्य कार्यस्य तथाभावात्। दुःखप्रध्वंसस्य तु कार्यस्यापि तद्वैपरी
सात्। न च दुःखान्तरोत्पादः कारणवर्जं कार्यानुत्पादात्। विवेकज्ञानोपजननपर्यन्तता च कारणत्वस्येति। एतच्चोपरिष्टादुपपादयिष्य
ते। अक्षरार्थस्तु। तस्मादानुश्रविकाद्दुःखप्रतीघातकाद्धेतोर्विपरीतः सत्त्वपुरुषान्यताप्रत्ययसाक्षात्कारो दुःखापघातको हेतुः।
अत एव श्रेयान्। आनुश्राविको हि वेदविहितत्वान्मात्रया दुःखापघातकत्वाच्च प्रशस्यः सत्त्वपुरुषान्यताप्रत्ययोऽपि प्रशस्यः त
दनयोः प्रशस्ययोर्मध्ये सत्त्वपुरुषान्यताप्रत्ययः श्रेयान्। कुतः पुनरस्योत्कर्ष इत्यत उक्तं व्यक्ताव्यक्तज्ञविज्ञानादिति। व्यक्ताव्यक्तं च
ज्ञश्च व्यक्ताव्यक्तज्ञाः तेषां विवेकेन ज्ञानं व्यक्ताव्यक्तज्ञविज्ञानं। व्यक्तज्ञानपूर्वकमव्यक्तस्य तत्कारणस्य ज्ञानं तयोश्च पारार्थ्येनाऽ
त्मा परो ज्ञायत इति ज्ञानक्रमेणाभिधानं। एतदुक्तं भवति। श्रुतिस्मृतीतिहासपुराणेभ्यो व्यक्तादीन् विवेकेन श्रुत्वा शास्त्रयुक्त्या च
व्यवस्थाप्य दीर्घकालादरनैरन्तर्यसत्कारसेवितात् भावनामयाद्विज्ञानादिति। यथा वक्ष्यति। एवं तत्त्वाभ्यासान्नास्मि न मे नाहमित्यप
रिशेषं अविपर्ययाद्विशुद्धं केवलमुत्पद्यते ज्ञानमिति। तदेवं प्रेक्षावदपेक्षितार्थत्वेन शास्त्रारम्भं समाधाय शास्त्रमारभमाणः श्रो
तृबुद्धिसमाधानाय तदर्थं संक्षेपतः प्रतिजानीते। मूलप्रकृतिरविकृतिर्महदाद्याः प्रकृति
विकृतयः सप्त। षोडशकस्तु विकारो न प्रकृतिर्न विकृतिः पुरुषः॥ संक्षेपतो हि शास्त्रार्थस्य चतस्रो विधाः। कश्चिदर्थः प्रकृतिरेव
कश्चिद्विकृतिरेव कश्चित्प्रकृतिविकृतिः कश्चिदनुभयरूपः। तत्र का प्रकृतिरेवेत्युक्तं मूलप्रकृतिरविकृतिः। प्रकरोतीति
प्रकृतिः प्रधानं सत्त्वरजस्तमसां साम्यावस्था। साऽविकृतिरिति न विकृतिरित्यर्थः। कस्मादित्यत उक्तं मूले। मूलं चासौ प्रकृतिश्चे

तिमूलप्रकृतिः। विश्वस्य कार्यकलापस्य सा मूलं। न तस्याः मूलांतरमस्ति। अनवस्थाप्रसंगात्। न चानवस्थायां प्रमाणमस्तीति भावः।
कतमाः पुनः प्रकृतिविकृतयः कियंत्यश्चेत्यत उक्तं। महदाद्याः प्रकृतिविकृतयः सप्त। प्रकृतयश्च ता विकृतयश्चेति प्रकृतिविकृतयः स
प्त। तथाहि। महत्तत्वमहंकारस्य प्रकृतिर्विकृतिश्च मूलप्रकृतेः। एवमहंकारतत्वं तन्मात्राणामिंद्रियाणां च प्रकृतिर्विकृतिश्च महतः।
एवं पंचतन्मात्राणि तत्वानि भूतानामाकाशादीनां प्रकृतयः विकृतयश्चाहंकारस्य। अथ का विकृतिरेव कियती चेत्यत उक्तं षोडशकस्तु विकार इति।
षोडशसंख्यापरिमितो गणः षोडशकः। तु शब्दोऽवधारणे भिन्नक्रमः। पंच महाभूतान्येकादशेंद्रियाणीति षोडशको गणो विकार एव न
प्रकृतिः। यद्यपि पृथिव्यादीनामपि गोघटवृक्षादयो विकाराः। एवं तद्विकारभेदानां पयोबीजादीनां दध्यंकुरादयः। तथापि। गवादयो बी
जादयो न पृथिव्यादिभ्यस्तत्वांतरं। तत्वांतरोपादानत्वं च प्रकृतित्वमिहाभिमतं इति न दोषः। सर्वेषां गोघटादीनां स्थूलतेंद्रियग्राह्यता च स ति
मेति न तत्वांतरत्वं। अनुभयरूपमाह। न प्रकृतिर्न विकृतिः पुरुष इति। एतत्सर्वमुपरिष्टादुपपादयिष्यते। इमम् अर्थं सामासिकं कर्तुं अ
भिमताः प्रमाणभेदा लक्षणीयाः। न च सामान्यलक्षणमंतरेण शक्यं विशेषलक्षणं कर्तुमिति प्रमाणसामान्यं तावल्लक्षय
ति। दृष्टमनुमानमाप्तवचनं सर्वप्रमाणसिद्धत्वात्। त्रिविधं प्रमाणमिष्टं प्रमेयसिद्धिः प्रमाणाद्धि। प्रमाणमिष्टमिति अ
त्र च प्रमाणमिति समाख्या लक्ष्यपदं तन्निर्वचनं च लक्षणं। प्रमीयतेऽनेनेति निर्वचनात् प्रमां प्रति करणत्वं गम्यते।
असंदिग्धाविपरीतानधिगतविषया चित्तवृत्तिः बोधः। पौरुषेयः फलं प्रमा तत्साधनं प्रमाणमिति। एतेन संशयवि
पर्ययस्मृतिसाधनेष्वप्रमाणेष्वप्रसंगः। संख्याविप्रतिपत्तिं निराकरोति। त्रिविधमिति। तिस्रो विधा यस्य प्र

माणसामान्यस्येति त्रिविधं। नन्यूनं नाप्यधिकमित्यर्थः। विशेषलक्षणानंतरं चैतदुपपादयिष्यामः। कतमाः पुनस्ता विधा इत्यत आह दृष्टम
नुमानमाप्तवचनं चेति। एतच्च लौकिकप्रमाणमभिप्रायं। लोकव्युत्पादनार्थत्वाच्छास्त्रस्य तस्यैवात्राधिकारात्। आर्षं तु विज्ञानं योगि
नामूर्द्ध्वस्रोतसां न लोकव्युत्पादनायालमिति सदपि नाभिहितमनधिकारात्। स्यादेतन्मा भून्न्यूनं अधिकं तु कस्मान्न भवति।
संगिरंते हि प्रतिवादिन उपमानादीन्यपि प्रमाणानीत्यत आह सर्वप्रमाणसिद्धत्वात्। एष्वेव दृष्टानुमानाप्तवचनेषु सर्वेषां
प्रमाणानां सिद्धत्वादंतर्भावादित्यर्थः। एतच्चोपपादयिष्यत इत्युक्तं। अथ प्रमेयव्युत्पादनाय प्रवृत्तं शास्त्रं कस्मात्सामान्यतो वि
शेषतश्च प्रमाणं लक्षयतीत्यत आह प्रमेयसिद्धिः प्रमाणाद्धीति। सिद्धिः प्रतीतिः। सेयमार्यार्थक्रमानुरोधेन पाठक्रममनादृत्य व्या
ख्याता। प्रसक्तमेव। अंगीकारात्। संप्रति प्रमाणविशेषलक्षणावसरे प्रसक्तस्य प्रमाणेषु ज्येष्ठत्वात् तदधीनत्वाच्चानुमानादीनां
सर्ववादिनामविप्रतिपत्तेश्च तदेव तावल्लक्षयति। प्रतिविषयाध्यवसायो दृष्टं त्रिविधमनुमानमाख्यातं। तल्लिंगलिंगिपूर्वकमाप्तश्रु
ताप्तवचनं तु॥ अत्र दृष्टमिति लक्ष्यनिर्देशः। परिशिष्टं तु लक्षणं। समानासमानजातीयव्यवच्छेदो लक्षणार्थः। अवयवार्थस्तु विषि
ण्वंति विषयिणमवबध्नंति स्वेन रूपेण निरूपणीयं कुर्वंतीति यावत्। विषयाः पृथिव्यादयः सुखादयश्चास्मदादीनां अविषे
याश्च। तन्मात्रलक्षणा योगिनामूर्ध्वस्रोतसां च विषयाः। विषयं विषयं प्रति वर्तते प्रतिविषयं इंद्रियं। वृत्तिश्च संनिकर्षः।
अर्थसंनिकृष्टमित्यर्थः। तस्मिन्नध्यवसाय अर्थेन सहेंद्रियस्य [illegible] तदाश्रित इत्यर्थः। अध्यवसायश्च बुद्धिव्यापा

५ तत्संयोगादचेतनं चेतनावदिव लिंगं। गुणकर्तृत्वेपि तथा कर्तेव भवत्युदासीन इति। अत्राध्यवसायग्रहणेन संशयं व्यवच्छिनत्ति।
रोज्ञानं उपात्तविषयाणामिन्द्रियाणां वृत्तौ सत्यां बुद्धेस्तमोभिभवे सति यः सत्त्वसमुद्रेकः सोध्यवसाय इति वृत्तिरिति ज्ञानमिति चाख्यायते।
इदं तत्प्रमाणं। अनेन यश्चेतनाशक्तेरनुग्रहस्तत्फलं प्रमा बोधः। बुद्धितत्त्वं हि प्राकृतत्वादचेतनमिति तदीयोध्यवसायोप्यचेतनो घटादि-
वत्। एवं बुद्धितत्त्वस्य सुखादयोपि परिणामभेदा अचेतनाः। पुरुषस्तु सुखाद्यननुषंगी चेतनः। सोयं बुद्धितत्त्ववर्तिना ज्ञानसुखादिना तत्प्रति-
बिंबितस्तच्छायापत्त्या ज्ञानसुखादिमानिव भवतीति चेतनोनुगृह्यते। चितिच्छायापत्त्या चाचेतना बुद्धिस्तदध्यवसायश्चाचेतनोपि चेतन इव
भवतीति। यथा वक्ष्यति। संशयस्यानवस्थितग्रहणेनानिश्चितरूपत्वात्। निश्चयोध्यवसाय इति चानर्थान्तरं। विषयग्रहणेनासद्विषयं
विपर्ययमपाकरोति। प्रतिग्रहणेनेन्द्रियार्थसंनिकर्षसूचनादनुमानस्मृत्यादयः परिहृता भवन्ति। तदेवं समानासमानजातीयव्यवच्छे-
दकत्वात् प्रतिविषयाध्यवसाय इति दृष्टस्य संपूर्णलक्षणं। तंत्रांतरेषु लक्षणांतराणि तैर्थिकानां न भूषितानि दूषितानि विस्तर-
भयादिति। नानुमानं प्रमाणमिति वदता लोकायतिकेनाऽप्रतिपन्नः संदिग्धो विपर्यस्तो वा पुरुषः कथं प्रतिपद्यते। न च पुरुषान्तर-
गता अज्ञानसंदेहविपर्ययाः शक्या अर्वाग्दृशा प्रत्यक्षेण प्रतिपत्तुं नापि प्रमाणांतरेण अनभ्युपगमात्। अनवधृताज्ञानसंशयविपर्य-
यास्तु यं कंचित्पुरुषं प्रति प्रवर्तमानोऽनवधेयवचनतया प्रेक्षावद्भिरुन्मत्तवदुपेक्ष्येत। तदनेनाज्ञानादयः परपुरुषवर्तिनोऽभिप्रा-
यभेदाद्वचनभेदाद्वा लिंगादनुमातव्या इति अकामेनाप्यनुमानं प्रमाणमभ्युपेयं। तत्र प्रत्यक्षकार्यत्वादनुमानं प्रत्यक्षानंतरं लक्ष-
णीयं। तत्रापि सामान्यलक्षणपूर्वकत्वाद्विशेषलक्षणस्यानुमानसामान्यं तावल्लक्षयति। लिंगलिंगिपूर्वकमिति। लिंगं व्याप्यं लिंगि व्यापकं।
नसा शंकितसमारोपितोपाधिनिराकरणेन स्वभावप्रतिबद्धं व्याप्यं येन च प्रतिबद्धं तद्व्यापकं। लिंगलिंगिग्रहणेन चात्र विषयवाचिना

रा
म

सां.दी

५

विषयित्वं प्रत्यक्षमुपलक्षयति । धूमादिर्व्याप्यो वह्न्यादिर्व्यापक इति यः प्रत्ययस्तत्पूर्वकं । लिंगिग्रहणं चावर्तनीयं । तेन च लिंगमस्यास्तीति पक्षधर्म
ताज्ञानमपि दर्शितं भवति । तद्व्याप्यव्यापकपक्षधर्मताज्ञानपूर्वकमनुमानमित्यनुमानसामान्यं लक्षितं । अनुमानविशेषांस्तंत्रांतर
गतानभिमतान्स्मारयति त्रिविधमनुमानमाख्यातं तदिति । तत्सामान्यतो लक्षितं विशेषतस्त्रिविधं । पूर्ववच्छेषवत्सामान्यतोदृष्टं
चेति । तत्र प्रथमतः तावद्द्विविधं । वीतमवीतं च । अन्वयमुखेन प्रवर्तमानं विधायकं वीतं । व्यतिरेकमुखेन प्रवर्तमानं निषेधकमवीतं । त
त्रावीतं शेषवत् । शिष्यते परिशिष्यत इति शेषः । स एव विषयतया यस्यास्त्यनुमानज्ञानस्य तच्छेषवत् । यदाहुः प्रसक्तप्रतिषेधेन्यत्राप्रसं
गाच्छिष्यमाणे संप्रत्ययः परिशेष इति । अस्य चावीतस्य व्यतिरेकिण उदाहरणमग्रेऽभिधास्यत इति । वीतं द्वेधा पूर्ववत्सामान्यतो
दृष्टं च तत्रैकं दृष्टस्वलक्षणसामान्यविषयं यत्तत्पूर्ववत् । पूर्वं प्रसिद्धं दृष्टस्वलक्षणसामान्यमिति यावत् । तदस्य विषयत्वेनास्त्यनुमान
मा ज्ञानस्येति पूर्ववत् । यथा धूमाद्वह्नित्वसामान्यविशेषः पर्वतेऽनुमीयते । तस्य वह्नित्वसामान्यस्य स्वलक्षणं वह्निविशेषो दृष्टो रस
वत्यां । अपरं वीतं सामान्यतोदृष्टमदृष्टस्वलक्षणसामान्यविषयं अनुमानं यथेंद्रियविषयमनुमानं । अत्र हि रूपादिज्ञानानां
क्रियात्वेन करणत्वमनुमीयते । यद्यपि च करणत्वसामान्यस्य छिदादौ वास्यादि स्वलक्षणमुपलब्धं । तथापि यज्जातीयं रूपादि
ज्ञाने करणं अनुमीयते तज्जातीयस्य करणत्वस्य न दृष्टं स्वलक्षणं प्रत्यक्षेण इंद्रियजातीयं हि तत्करणं न चेंद्रियत्वस्य सामान्यस्य
स्वलक्षणं इंद्रियविशेषः प्रत्यक्षगोचरो वार्वाग्दृशां । यथा वह्नित्वसामान्यस्य लक्षणं वह्निः । सोऽयं पूर्ववतः सामान्यतोदृष्टात्सत्यपि वी
तत्वेन तुल्यत्वे विशेषः । अत्र दृष्टं दर्शनं सामान्यत इति सामान्यस्य ... सार्वविभक्तिकस्तसिः । अदृष्टस्वलक्षणस्य सामान्य दृष्ट

५

विशेषस्य दर्शनमनुमान [illegible] मित्यर्थः। सर्वं चैतद् स्वामिन्यायवार्त्तिकतात्पर्यटीकायां व्युत्पादितमिति नेहोक्तं। विज्ञ
ज्ञरभयादिति। प्रयोजकत्वाद्भवणसमनंतरं प्रयोऽस्पष्टप्रवृत्तिहेतुज्ञानानुमानपूर्वकत्वाच्चाद्दर्य संबंधग्रहणस्य स्वार्थसंबं
धग्रहसहकारिणश्च शब्दस्यार्थप्रत्यायकत्वाद् अनुमानानंतरं शब्दं लक्षयति। आप्तश्रुतिराप्तवचनं चेति आप्तवचनमिति लक्षणनिर्देशः
परिशिष्टं लक्षणं। आप्ताः प्राप्ता युक्तेति यावत्। आप्ता चासौ श्रुतिश्चेत्याप्तश्रुतिः। श्रुतिर्वाक्यजनितं वाक्यार्थज्ञानं तच्च स्वतः प्रमा
णं अपौरुषेयवेदजनितत्वेन सकलदोषाशंकाविनिर्मुक्तं युक्तं भवति। एवं वेदमूलस्मृतीतिहासपुराणवाक्यजनितमपि ज्ञानं यु
क्तं। आदिविद्वुषश्च कपिलस्य कल्पादौ कल्पांतराधीतश्रुतिस्मरणसंभवः सुप्तप्रबुद्धस्येव पूर्वेद्युरवगतानामर्थानां परे
द्युः। तथा चावट्यजैगीषव्यसंवादे भगवान् जैगीषव्यो दशमहाकल्पवर्त्तिजन्मस्मरणमात्मन उवाच दशसु महासर्गेषु विपरि
वर्त्तमानेन मया इत्यादिना ग्रंथसंदर्भेण। आप्तवचनेनाप्युक्ताः शाक्यभिक्षुनिर्ग्रंथकसंसारमोचकादीनामागमाभासाः परिहृ
ता भवंति। अयुक्तत्वं चैतेषां विगानात् विच्छिन्नमूलत्वात् प्रमाणविरुद्धार्थाभिधानात् केश्चिदेव म्लेच्छादिपुरुषापसदैः पशु
प्रायैः परिग्रहात् द्रष्टव्यं। तु शब्देनानुमानाद् व्यवच्छिनत्ति। वाक्यार्थो हि प्रमेयः। न च तद्धर्मो वाक्यं येन तत्र लिंगं भवेत्। न
च वाक्यं वाक्यार्थं बोधयत् संबंधग्रहणमपेक्षते। अभिनवकविविरचितस्य वाक्यस्याऽदृष्टपूर्वस्याऽननुभूतचरवाक्या
र्थबोधकत्वादिति। एवं प्रमाणसामान्यलक्षणेषु तद्विशेषलक्षणेषु सत्सु यानि प्रमाणांतराण्युपमानादीनि प्रतिवादिभिर

टिप
सां·टी
६

भ्युपपन्नेतान्युक्तलक्षणेष्वेवप्रमाणेष्वंतर्भवंति। तथाहि। उपमानं तावद्यथा गौस्तथा गवय इति वाक्यं। तज्जनिता च धीरागम एव।
योप्ययं गवयशब्दो गोसदृशस्य वाचक इति प्रत्ययः सोप्यनुमानं। यो हि शब्दो यत्र वृद्धैः प्रयुज्यते सोऽसति वृत्त्यंतरे तस्य वा-चकौशब्दो कः
गोसदृशस्य प्रयुज्यते वृद्धैर्गवयशब्दो गोसदृश इति तस्यैव वाचक इति ज्ञानमनुमानमेव। यत्तु गवयस्य चक्षुःसंनिकृष्टस्य गोसादृश्यज्ञा
नं न तत्प्रत्यक्षमेव। अत एव च स्मर्यमाणायां गवि गवयसादृश्यज्ञानं प्रत्यक्षं। नह्यन्यत्किंचित्सारूप्यं हि मन्यद्गवये। भूयोवयवसामान्ययो
गो हि जात्यंतरवर्तीनां जात्यंतरे सादृश्यमुच्यते। सामान्ययोगश्चैकः। स च क्वचिद्ये प्रत्यक्षो गम्यापि न चेति नोपमानस्य प्रमेयांतरमस्ति
यत्र प्रमाणांतरमुपमानं भवेत्। अतो न प्रमाणांतरमुपमानं। एवमर्थापत्तिरपि न प्रमाणांतरं। तथाहि। जीवतश्चैत्रस्य गृहाभा
वदर्शनेन बहिर्भावस्यादृष्टस्य कल्पनादर्थापत्तिरभिमता वृद्धानां। साप्यनुमानमेव। यदा खलु सन्नेकत्र नास्ति तदान्यत्रास्ति।
यदा व्यापक एकत्रास्ति तदान्यत्र नास्तीति सुकरः स्वशरीरे एव व्याप्तिग्रहः। तथा च सतो गृहाभावेन लिंगेन बहिर्भावदर्शनमनु
मानमेव। न चैवं चैत्रस्य क्वचित्सत्त्वे न गृहाभावः शक्योपहोतुं येन नास्ति ह्यो गृहाभावो बहिर्भावेन हेतुः स्यात्। गृहाभावेन वा सत्त्वम
पहूयते येन सत्त्वमेवाद्युपपद्यमानमात्मानं न बहिरवस्थापयेत्। तथाहि। चैत्रस्य गृहासत्त्वेन सत्त्वमात्रं वा विरुध्येत गृहसत्त्वं वा।
न तावद्यत्र क्वचन सत्त्वस्यास्ति विरोधो गृहासत्त्वेन भिन्नविषयत्वात्। देशसामान्येन गृहविशेषासत्त्वेपोपि पाक्षिके इति सामान्यवि
षयतया विरोधो इति चेत् न। प्रमाणनिश्चितस्य गृहे सत्त्वस्य पाक्षिकतया सांशयिकेन गृहसत्त्वेन प्रतिक्षेपायोगात्। नापि प्रमाण
निश्चितो गृहाभावः पाक्षिकं स्वगृहसत्त्वं प्रतिक्षिपन्सत्त्वमपि प्रतिक्षेप्तुं सांशयिकत्वं चापनेतुं अर्हतीति युक्तं। गृहावच्छिन्नेन चैत्रा

म ग ६

भावेन गृह्येत सत्त्वं विरुद्धत्वात्प्रतिक्षिप्यते। ननु सत्त्वमात्रं। तस्य तत्रौदासीन्यात्। तस्माद्दृष्टाभावेन लिंगेन सतो वह्नेर्भावो ऽनुमीयत इत्युक्तं। एतेन
विरुद्धयोः प्रमाणयोर्विषयव्यवस्थया विरोधापादनमर्थापत्तेर्विषय इति प्रशस्तः। अवाच्यं नाऽनवच्छेदं नयोर्विरोधाभावात्। उदाहरणान्तराणि
चार्थापत्तेरेवमेवानुमानेऽन्तर्भावनीयानि। तस्मान्न प्रमाणान्तरमर्थापत्तिरिति सिद्धं। एवमभावोऽपि प्रत्यक्षमेव। न हि भूतलस्य परिणा
मविशेषात्केवलात्कल्पलक्षणादन्यो घटाभावो नाम प्रतिक्षणपरिणामिनो हि सर्व एव भावा ऋते चितिशक्तेः। स च परिणामभेद ऐन्द्रियिक
इति नास्ति प्रत्यक्षात्परं प्रमेयान्तरमनवरुद्धो विषयोपन्यासः भावाद्रूपं प्रमाणान्तरमभ्युपेयत इति। संभवस्तु खार्यां द्रोणाढकप्रस्थाद्य
वगमः स चानुमानमेव। खारीत्वं द्रोणाद्यविनाभूतं प्रतीतं खार्यां द्रोणादिसत्त्वमवगमयतीति। यच्चानिर्दिष्टप्रवक्तृकं प्रवादपारंपर्यमात्र
मिति होचुर्वृद्धा इत्यैतिह्यं। यथेह वटे यक्षः प्रतिवसतीति न तत्प्रमाणान्तरमनिर्दिष्टप्रवक्तृकत्वेन सांशयिकत्वात्। आप्तप्रवक्तृकत्वनिश्च
ये त्वागमः इत्युपपन्नं त्रिविधं प्रमाणमिति। एवं तावद्व्यक्ताव्यक्तज्ञलक्षणप्रमेयप्रसिद्ध्यर्थं प्रमाणानि लक्षितानि। तत्र व्यक्तं पृथिव्यादिस्व
रूपतः पांसुलपादको हालिकोऽपि प्रत्यक्षतः प्रतिपाद्यते। पूर्ववता चानुमानेन धूमादिदर्शनाद्वह्न्यादीति न तत्प्रसादनाय मंद
प्रयोजनं शास्त्रमिति तद्दुरधिगमनेन न प्रसाध्यं। तत्र यत्प्रमाणं यत्र शक्तं तदुपलक्षणो ऽन्यः प्रमाणेभ्यो निष्कृष्य दर्शयति। सामा
न्यतस्तु दृष्टादतीन्द्रियाणां प्रतीतिरनुमानात्। तस्मादपि चासिद्धं परोक्षमाप्तागमात्सिद्धं। इत्यनुशब्दः प्रत्यक्षपूर्वकत्वं विशिन
ष्टि सामान्यतो दृष्टादनुमानादध्यवसायादतीन्द्रियाणां प्रधानपुरुषादीनां प्रतीति तस्मादपि चासिद्धं परोक्षमाप्तेति व्याप
निर्धूरवसायादनुमानात्। उपलक्षणं चैतत् ... येषु सामान्यतो दृष्टमेव प्रवर्त्तते तथा च यत्र त

ध्य

राम
सां·दी
७

नास्ति महदाद्यारंभक्रमे स्वर्गापूर्वदेवतादौ चेतनानामभावः प्रामाण्यमित्यत आह। तस्मादपि चासिद्धं परोक्षमाप्तागमात्सिद्धं। तस्मादपीति।
सिद्धैवकारेणान्वयोऽवगतः। सत्यपि समुचितोऽस्यादेतत्। यथा गगनकुसुमकूर्मरोमशशविषाणादिषु प्रत्यक्षमप्रवर्तमानं तदभावमवगमय
त्येवं प्रधानादिष्वपि। तत्कथं तेषां सामान्यतो दृष्टादिभ्यः सिद्धिरित्यत आह। अतिदूरात्सामीप्यादिन्द्रियघातान्मनोऽनवस्थानात्। सौक्ष्म्या
द्व्यवधानादभिभवात्समानाभिहाराच्च॥७॥ अनुपलब्धिरिति वक्ष्यमाणं सिंहावलोकितन्यायेनानुषञ्जनीयं। यथोत्पतन्वियति पत
त्री अतिदूरतया सन्नपि प्रत्यक्षेण नोपलभ्यते। सामीप्यादित्यत्राप्यतिरनुवर्तनीयः। यथा लोचनस्थमञ्जनमतिसामीप्यान्न दृश्यते।
इन्द्रियघातोऽन्धत्वबधिरत्वादिः। मनोऽनवस्थानात् यथा कामाद्युपहतमनाः स्फीतालोकमध्यवर्तिनमिन्द्रियसन्निकृष्टमप्यर्थं न पश्यति। सौ
क्ष्म्यात्। यथेन्द्रियसन्निकृष्टमपि परमाण्वादि प्रणिहितमना अपि न पश्यति। व्यवधानात् यथा कुड्यादिव्यवहितं राजदारादि न पश्यति।
अभिभवात्। यथा अह्नि सौरीभिर्नाडीभिरभिभूतं ग्रहनक्षत्रमंडलं न पश्यति। समानाभिहाराद्यथा तोयदविमुक्तानुदबिंदून् ज
लाशये न पश्यति। चकारोऽनुक्तसमुच्चयार्थः। तेनानुद्भवोऽपि संगृहीतः। यथा क्षीराद्यवस्थायां दध्याद्यनुद्भवान्न दृश्यते। एतदुक्तं भ
वति। न प्रत्यक्षनिवृत्तिमात्राद्वस्त्वभावो भवत्यतिप्रसंगात्। तथा हि। गृहाद्विनिर्गतो गृहजनमपश्यंस्तदभावं निश्चिनुयात्। अपि तु
योग्यप्रत्यक्षनिवृत्तेरयमभावं निश्चिनोति। न च प्रधानपुरुषादीनां अस्ति प्रत्यक्षयोग्यतेति न तन्निवृत्तिमात्रात्तदभावनिश्चयो युक्तः
प्रामादिकानामिति। कतमत्पुनरेषु कारणं प्रधानादीनामनुपलब्धावित्यत आह। सौक्ष्म्यात्तदनुपलब्धिर्नाभावात्कार्यतस्तदुप
लब्धेः। महदादि तच्च कार्यं प्रकृतिसरूपं विरूपं च॥८॥ अर्थाभावादेव खपुष्पवदेतेषामनुपलब्धिः कस्मान्न भवतीत्य त्यक

६

त आह। नाभावात्। कुतः कार्यस्यानुपलब्धेः। तदिति प्रधानं परमर्षिरिति। पुरुषोपलब्धौ तु प्रमाणं वक्ष्यति। संघातपरार्थत्वादिति। इदानीं प्रमाणावधा-
रितेहि प्रत्यक्षमप्रवर्त्तमानं योग्यत्वान्न प्रवर्त्तत इति कल्प्यते। स परमसूक्ष्मरसो न प्रमाणावधारित इति न तत्र प्रत्यक्षयोग्यता शंक्या। ध्यवसितुमिति
भावः। किं पुनस्तत्कार्यं यतः प्रधानानुमानमित्यत आह महदादि तच्च कार्यं। एतच्च यथागमकं तथोपरिष्टादुपपादयिष्यते। तस्य च कार्य- त
स्य विवेकज्ञानोपयोगिनी स्वरूपवैरूप्ये आह। प्रकृतिसरूपं विरूपञ्च। एते चोपरिष्टाद्विभावनीये। कार्यात्कारणमात्रं गम्यते। संति
चात्र वादिनां विप्रतिपत्तयः। केचिदाहुरसतः सज्जायत इति। एकस्य सतो विवर्त्तः कार्यजातं न वस्तु सदित्यपरे। वेदांतिनः। अन्ये तु सतोऽ
सज्जायत इति। सतो सज्जायत इति वृद्धाः। तत्र पूर्वस्मिन्विकल्पत्रये प्रधानं नासिध्यति। सुखदुःखमोहभेदवत्स्वरूपपरिणामशा-
ब्दाद्यात्मकत्वं हि जगत्कारणस्य प्रधानत्वं सत्त्वरजस्तमःस्वभावत्वं। यदि पुनरसतः सज्जायेत असतो निरूपाख्यं कारणं कथं सुखा-
दिरूपशब्दाद्यात्मकं स्यात् सदसतोस्तादात्म्यानुपपत्तेः। अथैकस्य सतो विवर्त्तः शब्दादिप्रपंचस्तथापि सतः सज्जायत इति न
स्यात्। नाऽस्याऽद्वयस्य प्रपंचात्मकत्वं अपितु प्रपंचस्य प्रपंचात्मकतया प्रतीतिर्भ्रम एव। येषामपि कणभक्षाक्षचरणादीनां सतए-
व कारणादसतो जन्म तेषामपि सदसतोरेकत्वाऽनुपपत्तेर्न कार्यात्मकं कारणमिति न प्रधानसिद्धिः। अतः प्रधानसिध्यर्थं प्रथमं ता-
वत्सत्कार्यं प्रतिजानीते। असदकारणादुपादानग्रहणात्सर्वसंभवाभावात्। शक्तस्य शक्यकारणात्कारणभावाच्च सत्कार्यं। ९ ॥
सत्कार्यं कारणव्यापारात्प्रागपीति शेषः। तथा च न सिद्धसाधनं नैयायिकतनयैरुद्भावनीयं। यद्यपि बीजमृत्पिंडादिप्रध्वंसानंत-
रमंकुरघटाद्युत्पत्तिरुपलभ्यते तथापि न प्रध्वंसस्य कारणत्वमपि तु भावस्यैव बीजाद्यवयवस्य। अभावानुभावस्योऽसतो न

रा म
सां·टी
८

स्य सर्वत्र सुलभत्वात्सर्वत्र सर्वदा कार्योत्पादप्रसंग इत्यादिन्यायवार्तिकतात्पर्यटीकायां अभिहितमस्माभिः। प्रपंचप्रसंगभयात्। सति
वाधके न शक्नोमि वेति वक्तुमिति कथमभ्यासि वरणमसतमनवलोक्य ते। तत्रेदं प्रतिज्ञातं सत्कार्यमिति। अत्र हेतुमाह। असदकरणात्।
असत्त्वे कारणव्यापारात्पूर्वं कार्यनास्य सत्त्वं केनापि कर्तुं शक्यं। न हि नीलं शिल्पिसहस्रेणापि शक्यं पीतं कर्तुं। सदसत्त्वे घटस्य धर्मा
विति चेत्। तथाप्यसति धर्मिणि न तस्य धर्म इति सत्त्वं तदवस्थमेव। तथा च नासत्त्वं। असंबद्धे नाऽनेतादृशेन नाऽसत्त्वेन कथं समेत्
घटः। तस्मात्कारणव्यापारादूर्ध्वमिव ततः प्रागपि सदेव कार्यं। कारणात्तस्य सतोऽभिव्यक्तिरेव क्रियते। सतश्चाभिव्यक्तिरुपपन्ना
यथा पीडने न तिलेषु तैलस्य। अवघातेन धान्येषु तंडुलानां। दोहनेन सौरभेयीषु पयसः। असतः करणे तु न निदर्शनं किंचिदस्ति।
न खल्वभिव्यज्यमानं वोत्पद्यमानं वा क्वचिदसद्दृष्टं। इतश्च कारणव्यापारात्प्राक्सदेव कार्यमित्याह। उपादानग्रहणात्। उपादा
नानि कारणानि तेषां ग्रहणं कार्येण संबंधः उपादानैः कार्यस्य संबंधादिति यावत्। एतदुक्तं भवति। कार्येण संबद्धं कारणं कार्यस्य
जनकं संबंधश्च कार्यस्यासतो न संभवति। तस्मात्सदिति। स्यादेतत् असंबद्धमेव कारणैः कस्मात्कार्यं न जन्यते तथा चाऽसदेवोत्पत्स्यत इत्यत्र
तआह। सर्वसंभवाभावात्। असंबद्धस्य जन्यत्वे संबद्धत्वाविशेषेण सर्वं कार्यजातं सर्वस्माद्भवेत्। न चैतदस्ति तस्मात्। संबद्धं संबं
धेन जन्यते इति। यथाहुः सांख्यवृद्धाः। असत्त्वे नास्ति संबंधः कारणैः सत्त्वसंगतिः। असंबद्धस्य चोत्पत्तिमिच्छतो न व्यवस्थि
तिरिति। स्यादेतत् असंबद्धमपि सत्तदेव करोति यत्र यत्कारणं शक्तं। शक्तिश्च कार्यदर्शनादवगम्यते। तो नाव्यवस्थेति अत आह
सं शक्तस्य शक्यकरणात्। सा शक्तिः शक्तकारणाश्रया सर्वत्र वा स्यात् शक्ये वा। सर्वत्र चेत्तदवस्थैवाऽव्यवस्था। शक्ये चेत्कथमसति शक्ये
तत्रेति वक्तव्यं। शक्तिभेद एव स तादृशो यतः किंचिदेव जनयेत्सर्वमिति चेत्। हंत भोः शक्तिविशेषः कार्यसंबद्धोऽसं स·क
कार्य वा ८

वद्धो वा संवद्धत्वेनासतः संवंध इति सत्कार्यं। असंवद्धपक्षे सैवाव्यवस्थेति सुष्ठूक्तं शक्तस्य शक्यकरणादिति। इतश्च सत्कार्यमित्याह। कारणभा
वाच्च कार्यस्य कारणात्मकत्वात्। न हि कारणाभिन्नं कार्यं कारणं सदिति कथं तदभिन्नं कार्यमसद्भवेत्। कार्यस्य कारणाभेदसाधकानि
च प्रमाणानि। न पटस्तंतुभ्यो भिद्यते तद्धर्मत्वात्। इह यद्यतो भिद्यते तत्तस्य धर्मो न भवति यथा गौरश्वस्य। धर्मश्च पटस्तंतूनां तस्मान्ना
र्थांतरं। उपादानोपादेयभावाच्च नार्थांतरत्वं तंतुपटयोः। ययोरर्थांतरत्वं न तयोरुपादानोपादेयभावः यथा घटपटयोः। उपादानोपादेय
भावश्च तंतुपटयोः तस्मान्नार्थांतरत्वमिति। इतश्च नार्थांतरत्वं तंतुपटयोः संयोगाप्राप्त्यभावात्। अर्थांतरत्वे हि संयोगो दृष्टो यथा
कुंडवदरयोः। अप्राप्तिर्वा यथा हिमवद्विंध्ययोः। न चेह संयोगाप्राप्ती तस्मान्नार्थांतरत्वमिति। इतश्च पटस्तंतुभ्यो न भिद्यते गुरुत्वां
तरकार्याग्रहणात्। इह यद्यस्माद्भिन्नं तस्मात्तस्य गुरुत्वांतरकार्यं गृह्यते यथा पलिकस्य स्वस्तिकस्य यो गुरुत्वकार्यो ऽवनतिवि
त्र शेषस्तस्माद्द्विपलिकस्य स्वस्तिकस्य गुरुत्वकार्यो ऽवनतिविशेषो ऽधिकः। न च तथा तंतुगुरुकार्यात्पटगुरुत्वस्य कार्यांतरं दृ
श्यते। तस्मादभिन्नस्तंतुभ्यः पट इति। तान्येतान्यवीतान्यभेदसाधनानि। तदेवमभेदे सिद्धे तंतव एव तेन तेन संस्थानभेदेन
परिणताः पटो न तु तेभ्यो ऽर्थांतरं पटः। स्वात्मनि क्रियाविरोधसंवंधबुद्धिव्यपदेशार्थक्रियाभेदाश्च नैकांतिकं भेदं साधयितुमर्हंति।
एकस्मिन्नपि तत्तत×न्न×द्विशेषाऽविर्भावतिरोभावाभ्यामेतेषामविरोधात्। यथा कूर्मस्यांगानि कूर्मशरीरे निविशमानानि ति
रोभवंति निःसरंति चाविर्भवंति। न तु कूर्मात्तदंगान्युत्पद्यंते प्रध्वंसंते वा। एवमेकस्या मृदः सुवर्णस्य वा घटमुकुटादयो विशेषा निश्च
रंत आविर्भवंत उत्पद्यंत इत्युच्यंते। निविशमानास्तिरोभवंतो विनश्यंतीत्युच्यंते। न पुनरसतामुत्पादः सतां वा विरोधः। यथा

पम

सां·दी हभगवान्कृष्णद्वैपायनः।नासतोविद्यतेभावोनाभावोविद्यतेसतइति।यथाकूर्मःस्वावयवेभ्यःसंकोचविकाशिभ्योनभिंनएवंघटमुकुटाद

६ योपिमृत्सुवर्णादिभ्योनभिंनाः।एवंचेहतंतुषुपटइतिव्यपदेशोपियथेहवनेतिलकाइत्युपपंनः।नचार्थक्रियाभेदोभेदमापादयति।ए

कस्यापिनानार्थक्रियादर्शनात्।यथैकएववह्निर्दाहकःप्रकाशकःपाचकश्चेति।नाप्यर्थक्रियाव्यवस्थावस्तुभेदव्यवस्थाहेतुः।

तेषामेवसमस्तव्यस्तानामर्थक्रियाव्यवस्थादर्शनात्।यथाप्रत्येकंविष्टयोवर्त्मदर्शनलक्षणामर्थक्रियांकुर्वंतिनशिविकावहनंमि

लितास्तुशिविकांवहंति।एवंतंतवःप्रत्येकंप्रावरणमकुर्वाणाअपिमिलिताःआविर्भूतपटभावाःप्रावरिष्यंति।स्यादेतत्आविर्भावः

पटस्यकारणव्यापारात्प्राक्सन्नसन्वा।असंश्चेत्प्राप्तंतर्ह्यसतःउत्पादनं।अथसन्कृतंतर्हिकारणव्यापारेणनहिसतिकार्येका

रणव्यापारप्रयोजनंपश्यामः।आविर्भावेचाविर्भावांतरकल्पनेनवस्थाप्रसंगः।तस्मादाविर्भूतपटभावास्तंतवःक्रियंतइ

तिरिक्तंवचः।अथासदुत्पद्यतइत्यत्रापिमतंकेयमसदुत्पत्तिःसतीअसतीवा।सतीचेत्कृतंतर्हिकारणैः।असतीचेत्तस्याअप्युत्पत्त्यं

तरमित्यनवस्था।अथोत्पत्तिःपटान्नार्थांतरमपितुपटएवासौतथापियावदुक्तंभवतिपटइतितावदुक्तंभवत्युत्पद्यतइति।ततश्च

पटइत्युक्तेउत्पद्यतइतिनवाच्यंपौनरुक्त्यात्।विनश्यतीत्यपिनवाच्यंविरोधात्।तस्मादियंपटोत्पत्तिःस्वकारणसमवायोवास्वसत्तास

पा मवायोवाउभयथापिनोत्पद्यते।अथचतदर्थानिकारणानिव्याप्रियंते।एवंसतएवपटादेराविर्भावायकारणापेक्षेत्युपपंनं।

नंचपटरूपेणकारणानांसंबंधस्तद्रूपस्यक्रियात्वात्क्रियासंबंधित्वाच्चकारणानां।अन्यथाकारकत्वाभावात्।तस्मान्नसत्का

र्यमितिपुष्कलं।तदेवंप्रधानसाधनानुगुणंसत्कार्यमुपपाद्ययादृशंतत्प्रधानंसाधनीयंतादृशमादर्शयितुंविवेकज्ञा तत्त्व

६

नो पयो गिनी व्यक्ताव्यक्ते साऽरूप्य वैरूप्ये च तावदाह। हेतुमदनित्यमव्यापि सक्रियमनेकमाश्रितं लिंगं। सावयवं परतंत्रं व्यक्तं विपरीत
मव्यक्तं॥१०॥ व्यक्तं हेतुमत् हेतुः कारणं तद्वत्। यस्य च यो हेतुस्तस्य तमुपरिष्टाद्वक्ष्यति। अनित्यं विनाशि। तिरोभावीति यावत्। अ
व्यापि सर्वं परिणामि न व्याप्नोति। कारणे न हि कार्यमाविष्टं न कार्येण कारणं। न च बुध्यादयः प्रधानं वेविषती स व्यापकाः। सक्रियं परिस्पंदवत्। तथाहि।
बुध्यादय उपात्तमुपात्तं देहं त्यजंति देहांतरं चोपाददत इति तेषां परिस्पंदः। शरीरपृथ्व्यादीनां च परिस्पंदः प्रसिद्ध एव। अनेकं प्रतिपुरुषं बुध्यानां भेदात्।
पृथ्व्याद्यपि शरीरघटादिभेदेनानेकमेव। आश्रितं स्वकारणमाश्रितं बुध्यादिकार्यं। अभेदेपि कथंचिद्भेदविवक्षया आश्रयाश्रयिभावो यथेह वने
तिलका इति। लिंगं प्रधानस्य यथा चैतेषु बुध्यादयः प्रधानस्य लिंगं न तथोपरिष्टाद्वक्ष्यति। प्रधानं तु न प्रधानस्य लिंगं पुरुषस्य लिंगं भवेदपीति
भावः। सावयवं। अवयविनमवयवो मिश्रणं संयोग इति यावत्। अप्राप्तिपूर्विका प्राप्तिः संयोगः। तेन सवर्त्तत इति सावयवं। तथाहि। पृथ्व्यादयः प
ध्या रस्परं संयुज्यंते। एवमन्येपि। न तु प्रधानस्य बुध्यादिभिः संयोगः। तादात्म्यात्। नापि सत्त्वरजस्तमसां परस्परं संयोगः प्राप्तेरभावात्। परतंत्रं
बु... हि स्वकार्ये हंकारे जनयितव्ये प्रकृत्यापूरोपेक्षते। अन्यथा क्षीणा सती नालमहंकारं जनयितुमिति। स्थितिः। एवमहंकारादि
भिरपि स्वकार्यजनने इति सर्वं स्वकार्ये प्रकृत्यापूरादपेक्षते। तेन प्रकृतिपरामपेक्षमाणं स्वकार्योदजनने परतंत्रं व्यक्तं। विप
रीतमव्यक्तं व्यक्तात्। अहेतुमन्नित्यं व्यापि निःक्रियं। यद्यप्यव्यक्तस्यास्ति परिणामलक्षणा क्रिया तथापि परिस्पंदो नास्ति। एक
मनाश्रितं अलिंगमनवयवं स्वतंत्रमव्यक्तं। तदनेन प्रबंधेन व्यक्ताव्यक्तयोर्वैधर्म्यमुक्तं। संप्रति तयोः साधर्म्यं पुरुषाच्च वैध
र्म्यमाह। त्रिगुणमविवेकि विषयः सामान्यमचेतनं प्रसवधर्मि व्यक्तं तथा प्रधानं तद्विपरीतस्तथा च पुमान्॥११॥ त्रिगुणं त्रयो न
गुणाः सुखदुःखमोहा अस्येति त्रिगुणं। तदनेन सुखादीनामात्मगुणत्वं परैरभिमतमपाकृतं। अविवेकि यथा प्रधानं

न स्वतो विविच्यते एवं महदादयोऽपि न प्रधानाद्विविच्यंते। तदात्मकत्वात्। अथवा संभूयकारिताऽविवेकि। न हि किंचिदेकं पर्याप्तं
स्वकार्ये, अपि तु संभूय। तत्र न कस्यचिदेकस्मात्संभव इति। ये तु विज्ञानमेव हर्षविषादमोहशब्दाद्याकारं न पुनरितोऽन्य
स्तद्धर्मेति तान्प्रत्याह। विषय इति। विषयो ग्राह्यो विज्ञानाद्बहिरिति यावत्। अत एव सामान्यं साधारणं। विज्ञानाकारत्वे तु
असाधारण्याद्विज्ञानानां वृत्तिरूपाणां तेऽप्यसाधारणाः स्युः। विज्ञानं ह्यन्येन न गृह्यते। परबुद्धेरप्रत्यक्षत्वात्। अभिप्रायः
तथा च नर्तकीभ्रूलताभंगे एकस्मिन्बहूनां प्रतिसंधानं युक्तं अन्यथा न स्यादिति भावः। अचेतनं सर्व एव प्रधानबुद्ध्याद
योऽचेतनाः। न तु वैनाशिकवच्चैतन्यं बुद्धेरित्यर्थः। प्रसवधर्मि। प्रसवरूपो धर्मोऽस्यास्तीति प्रसवधर्मी। प्रसवधर्मेति
वक्तव्ये मत्वर्थीयः प्रसवधर्मस्य नित्ययोगमाख्यातुं। सरूपविरूपपरिणामाभ्यां न कदाचिदपि वियुज्यत इत्यर्थः। व्यक्त
वत्तमव्यक्तेति द्विरावृत्ति तथा प्रधानमिति। यथा व्यक्तं तथा प्रधानमपीत्यर्थः। व्यक्ताव्यक्ताभ्यां व्यक्ताव्यक्तौ ताभ्यां वैधर्म्यं पुरुष
स्याह। तद्विपरीतः पुमान्। स्यादेतत्। अहेतुमत्त्वनित्यत्वादि प्रधानसाधर्म्यमस्ति पुरुषस्य। एवमनेकत्वं व्यक्तसाधर्म्यमिति तत्कथमु
च्यते तद्विपरीतः पुमानित्यत आह। तथा च। चकारोऽप्यर्थः। यद्यप्यहेतुमत्त्वादि साधर्म्यं तथाप्यत्रैगुण्यादि वैपरीत्यमस्त्य
र्थः। त्रिगुणमिति सूक्तं तत्र के ते त्रयो गुणाः किं च तदुपलक्षितमित्यत आह। प्रीत्यप्रीतिविषादात्मकाः प्रकाशप्रवृत्तिनि
यमार्थाः। अन्योन्याभिभवाश्रयजननमिथुनवृत्तयश्च गुणाः॥१२॥ गुणा इति परार्थाः। सत्त्वं लघु प्रकाशकमित्यत्र वक्ष्य
माणाः सत्त्वादयः क्रमेण निर्दिश्यन्ते। तदनागतावेक्ष[illegible] यथासंख्यं वेदितव्यं। एतदुक्तं भवति। १०

प्रीतिः सुखं प्रीत्यात्मकः सत्त्वं गुणः। अप्रीतिर्दुःखं अप्रीत्यात्मको रजोगुणः। विषादो मोहः विषादात्मकस्तमोगुण इति। ये तु मन्यन्ते
न प्रीतिर्दुःखाभावादतिरिच्यते। एवं दुःखमपि न प्रीत्यभावादन्यदिति। तान् प्रत्यात्मग्रहणं। नेतरेतराभावाः सुखादयो। पि
तु भावाः। आत्मशब्दस्य भाववचनत्वात्। प्रीतिरात्मा भावो येषां ते प्रीत्यात्मानः। एवमन्यदपि व्याख्येयं। भावरूपता चैषाम
नुभवसिद्धा। परस्पराभावात्मकत्वे तु परस्पराश्रयत्वेनैकस्याप्यसिद्धेरुभयासिद्धिरिति भावः। स्वरूपमेषां गुणानामु
क्त्वा प्रयोजनमाह। प्रकाशप्रवृत्तिनियमार्थाः। अत्रापि यथासंख्यमेव। रजः प्रवर्त्तकत्वात् सर्वत्र लघु सत्त्वं प्रवर्त्तयेत्। यदि
१२ तमसा गुरुणा न नियम्येत। तमोनियतं तु क्वचिदेव प्रवर्त्तयतीति भवति तमो नियमार्थं। प्रयोजनमुक्त्वा क्रियामाह। अन्यो
न्याभिभवाश्रयजननमिथुनवृत्तयश्च। वृत्तिः क्रिया। सा च प्रत्येकमभिसंबध्यते। अन्योन्याभिभववृत्तयः। एषा
मन्यतमेनार्थवशादुद्भूतेनान्यदभिभूयते। तथाहि। सत्त्वं रजस्तमसी अभिभूय शान्तामात्मनो वृत्तिं प्रतिलभते प्राप्नोति। ए
वं रजः सत्त्वतमसी अभिभूय घोरां। एवं तमः सत्त्वरजसी अभिभूय मूढामिति। अन्योन्याश्रयवृत्तयः। यद्यप्याधाराधेय
भावो नाश्रयार्थो घटते तथापि यदपेक्षया यस्य क्रिया स तस्याश्रयः। तथाहि। सत्त्वं प्रवृत्तिनियमावाश्रित्य रजस्तमसोः
प्रकाशेनोपकरोति। रजः प्रकाशनियमावाश्रित्य प्रवृत्त्येतरयोः। तमः प्रकाशप्रवृत्ती आश्रित्य नियमेनेतरयोरिति।
अन्योन्यजननवृत्तयः। अन्यतमोन्यतमं जनयति। जननं च परिणामः। स च गुणानां सदृशरूपः। अत एव न हेतुमत्त्वं।

३

परम
सां-टी
३३
पि
क

न्तरांतरस्य हेतोरभावात्। नाप्यनिसत्त्वं न सांतरेलयाभावात्। अन्योन्यमिथुनवृत्तयः। अन्योन्यसहचाराः अविनिर्भागवर्त्तय
इति यावत्। चः समुच्चये भवति चात्रागमः। अन्योन्यमिथुनाः सर्वे सर्वत्रगामिनः। रजसो मिथुनं सत्त्वं सत्त्वस्य मिथुनं
रजः। तमसश्चापि मिथुने ते सत्त्वरजसी उभे। उभयोः सत्त्वरजसोर्मिथुनं तम उच्यते। नैषामादिः संप्रयोगो वियोगो वोपलभ्यत इति।
प्रकाशप्रवृत्तिनियमा र्था इत्युक्तं तत्र के ते इत्यत्रभूताः कुतश्चेत्यत आह। सत्त्वं लघु प्रकाशकमिष्टमुपष्टम्भकं चलं च रजः। गु
रुवरणकमेव तमः प्रदीपवच्चार्थतो वृत्तिः। १३। सत्त्वमेव लघु प्रकाशकमिष्टं सांख्याचार्यैः। तत्र कार्योद्गमने हेतुर्धर्मो लाघवं गौ
रवप्रतिद्वन्द्वि। यतोऽग्नेरूर्ध्वज्वलनं भवति। तदेव लाघवं कस्य चित्तिर्यग्गमनहेतुर्यथा वायोः। एवं करणानां वृ
त्तिपटुत्वहेतुर्लाघवं। गुरुत्वे हि मंदानि स्युरिति। सत्त्वस्य प्रकाशकत्वमुक्तं। सत्त्वतमसी स्वयमक्रियतया स्वकार्यप्रवृत्ति
प्रति प्रसवसीदंती रजसोपष्टभ्येते। अवसादात्प्रच्याव्य स्वकार्ये उत्साहं प्रयत्नं कार्येते। तदिदमुक्तमुपष्टम्भकं रज इति।
कस्मादित्यत उक्तं चलमिति। तदनेन रजसः प्रवृत्त्यर्थं दर्शितं। रजस्तु चलतया परितस्त्रैगुण्यं चालयेत्। गुरुवरणकमेव
तमः तत्र तत्र प्रवृत्तिप्रतिबंधकेन क्वचिदेव प्रवर्त्तयतीति ततस्ततो व्यावर्त्तमानो नियामकमुक्तं गुरुवरणकमे
व तम इति। एवकारः प्रत्येकं भिन्नक्रमः संबध्यते। सत्त्वमेव रज एव तम एवेति। ननु च परस्परविरोधशीला गुणाः सु
न्दोपसुंदवत्परस्परं ध्वंसंत इत्येव युक्तं प्रागेव तेषामेकक्रियाकर्तृत्वे इत्यत आह। प्रदीपवच्चार्थतो वृत्तिः। दृष्टमेतत्

सांक
११

यथा वर्त्तितैले अनलविरोधिनी अथ च मिलिते सहानलेन रूपप्रकाशलक्षणं कार्यं कुरुतः यथा च वातपित्तश्लेष्माणः परस्परवि
रोधिनः शरीरधारणलक्षणकार्यकारिणः एवं सत्त्वरजस्तमांसि मिथो विरुद्धान्यप्यनुवर्त्स्यन्ति च स्वकार्यं करिष्यन्ति च। अर्थ
त इति पुरुषार्थत इति यावत्। यथा वक्ष्यते पुरुषार्थ एव हेतुर्न केनचित् कार्यते करणमिति। अत्र च सुखदुःखमोहाः परस्परविरोधिनः स्वानु
रूपाणि सुखदुःखमोहात्मकान्येव निमित्तानि कल्पयन्ति तेषां च परस्परमभिभाव्याभिभावकभावान्नानात्वं। तथा एकैव स्त्री रूप
यौवनकुलशीलसंपन्ना स्वामिनं प्रति सुखाकरोति। तत्कस्य हेतोः स्वामिनं प्रति तस्याः सुखरूपसमुद्भवात्। सैव स्त्री सपत्नीर्दुःखाकरोति।
ग तत्कस्य हेतोः ताः प्रति तस्या दुःखरूपसमुद्भवात्। एवं पुरुषान्तरं तामविन्दत् सैव मोहयति। तत्कस्य हेतोः तं प्रति तस्या मोहरूपसमुद्भ
वात्। अनया च स्त्रिया सर्वे भावा व्याख्याताः। तत्र यत्सुखहेतुस्तत्सुखात्मकं सत्त्वं यद्दुःखहेतुस्तद्दुःखात्मकं रजः यन्मोहहेतुस्तन्मोहा
त्मकं तमः। सुखप्रकाशलाघवानां त्वेकस्मिन् युगपदुद्भूतावविरोधः सहदर्शनात्। तस्मात्सुखदुःखमोहैरिव विरोधिभिरविरोधिभिः
सुखदुःखप्रकाशलाघवैर्न निमित्तभेदा उन्नीयन्ते। एवं दुःखोपष्टम्भकत्वप्रवर्त्तकत्वैरेवं मोहगुरुत्वावरणैरिति सिद्धं त्रैगुण्यमि
ति। स्यादेतत्। अनुभूयन्त एव रोहन्ति तेषां कुतस्समविवेकित्वं विषयत्वं सामान्यत्वमचेतनत्वं प्रसवधर्मित्वं चेत्यत आह। अविवे
क्यादेः सिद्धिस्त्रैगुण्यात्तद्विपर्ययाभावात्। कारणगुणात्मकत्वात् कार्यस्याव्यक्तमपि सिद्धं ॥१४॥ अविवेकित्वमविवेकि। यथा प्रधाने क
वोऽर्द्धं वचने कवचनं इत्यत्र द्वित्वैकत्वयोरिति। अन्यथा द्व्येकयोरिति तस्यादिति। कुतः पुनरविवेकित्वादिति सिद्धिरित्यत आह।
त्रैगुण्यादिति। यत्सुखदुःखमोहात्मकं तदविवेकवदादियोगि यथेदमनुभूयमानं व्यक्तमिति स्फुटत्वादन्वयेनोक्तः। व्यतिरेक

जै

महदादिपर्यायाभावात्। अविवेक्यादिविपर्यये पुरुषे त्रिगुणाभावात्। अथवा व्यक्ताव्यक्तपक्षीकृतान्वयाभावेनावीतहेतु
स्त्रैगुण्यादिति वक्तव्यः। स्यादेतत् अव्यक्तसिद्धौ सत्यां तस्याविवेकित्वादयो धर्माः सिध्यन्ति। अव्यक्तमेव त्वद्यापि न सिध्यति तत्कथ
मविवेकित्वादिसिद्धिरित्यत आह। कारणगुणात्मकत्वात् कार्यस्याव्यक्तमपि सिद्धं। अयमभिसंधिः। कार्यं हि कारणगुणा
त्मकं दृष्टं यथा तन्त्वादिगुणात्मकं पटादि। तथा महदादिलक्षणेनापि कार्येण सुखदुःखमोहरूपेण स्वकारणगतसुखदुःख
मोहात्मना भवितव्यं। तथा च तत्कारणं सुखदुःखमो हात्मकं प्रधानमव्यक्तं सिद्धं भवतीति। स्यादेतत्। व्यक्ता
द्व्यक्तमुत्पद्यत इति कणभक्षाक्षचरणतनयाः। परमाणवो हि व्यक्तास्ते च द्व्यणुकादिक्रमेण पृथिव्यादिलक्षणं कार्यं व्यक्तमारभ्य
ते पृथिव्यादिषु च कारणगुणक्रमेण रूपाद्युत्पत्तिः। तस्माद्व्यक्ताद्व्यक्तस्य तद्गुणस्य चोत्पत्तेः कृतमदृष्टचरेणाव्यक्तेनेत्यत आ त
ह। भेदानां परिमाणात् समन्वयाच्छक्तितः प्रवृत्तेश्च। कारणकार्यविभागादविभागाद्वैश्वरूप्यस्य। १५। कारणमस्त्यव्यक्तं। भेदानां विशेषा
भूता नो णां महदादीनां कार्याणां मूलकारणमस्त्यव्यक्तं। कुतः। कारणकार्यविभागादविभागाद्वैश्वरूप्यस्य। कारणे सत्कार्यमिति स्थि
तं। यथा कूर्मशरीरे सन्त्येवाङ्गानि निःसरन्ति विभज्यन्ते इदं कूर्मशरीरमेतान्यस्याङ्गानीति। एवं निविशमानानि तस्मिन्नव्यक्तो भवति। एवं
कारणान्मृत्पिण्डाद्धेमपिण्डाद्वा कार्याणि कटककुण्डलमुकुटघटादीनि सन्त्येवाविर्भवन्ति विभज्यन्ते। सन्त्येव च पृथिव्यादीनि कारणात्तन्मात्रा दावि
र्भवन्ति विभज्यन्ते। सन्त्येव तन्मात्राण्यहंकाराकारणात्। सन्नेवाहंकारः कारणान्महतः। सन्नेव च महान्परमाव्यक्तादिति। सोयं का
रणात्परमाव्यक्तात्साक्षात्पारम्पर्येण विश्वस्य कार्यस्य विभागः। प्रतिसर्गे तु मृत्पिण्डं हेमपिण्डं वा कुटमुकुटादयो निविशन्तोऽव्यक्ती भवंति

भवंति।तत्कारणरूपमेवाऽभिव्यक्तं कार्यमपेक्ष्याऽव्यक्तं भवति।एवं पृथ्व्यादयस्तन्मात्राणि विशंतः स्वापेक्षया तन्मात्राण्यव्यक्तयंति।एवं तन्मात्राण्यहं
कारं निविशंति अहंकारमव्यक्तयंति।एवमहंकारो महांतमाविशंस्तमव्यक्तयति।महान्प्रकृतिं स्वंकारणं विशन्प्रकृतिमव्यक्तयति।प्र
कृतेस्तु न क्वचिन्निवेश इति सा सर्वकार्याणामव्यक्तमेव।सोयमविभागः प्रकृतौ वैश्वरूप्यस्य नानारूपस्य कार्यस्य।स्वार्थिकः ष्यञ्।
तस्मात्कारणे कार्यस्य सत एव विभागाऽविभागाभ्यां अव्यक्तं कारणमस्तीति।इतश्चाव्यक्तमस्तीत्याह शक्तितः प्रवृत्तेश्च।कारणशक्ति
तः कार्यं प्रवर्तत इति सिद्धं।अशक्तात्कारणात्कार्याऽनुत्पत्तेः।शक्तिश्च कारणगता न कार्यस्याऽव्यक्तत्वादन्या नहि सत्कार्यपक्षे कार्यस्याऽव्य र्य
क्ततायाअन्यस्यां शक्तौ वलिप्रमाणं।अयमेव हि सिकताभ्यस्तिलानां तैलोपादानानां भेदो यदेतेष्वेव तैलमस्त्यनागतावस्थं नसिकतास्वि
तिप ति।स्यादेतत्।शक्तितः प्रवृत्तेः कारणकार्यविभागाऽविभागौ च महत एव परमाव्यक्तत्वं साधयिष्यतः कृतं ततः परेणाऽव्यक्तेनेत्यत आह।परि
माणात्।परिमितत्वादव्यापित्वादिति यावत्।विवादाध्यासिता महदादिभेदा अव्यक्तकारणवंतः परिमितत्वात् घटादिवत्।घटादयो हि परिमिता
मृदाद्यव्यक्तकारणका दृष्टाः।उक्तमेतत् यथा कार्यस्याऽव्यक्तावस्था कारणमेति।यन्महतः कारणं तत्परमाव्यक्तं ततः परतराव्यक्तकल्प
नायाः प्रमाणाभावात्।इतश्च विवादाध्यासिता भेदा अव्यक्तकारणवंतः समन्वयात्।भिन्नानां सरूपता समन्वयः।सुखदुःखमोहसमन्वि
ताहि बुध्यादयो ध्यवसायादिलक्षणाः प्रतीयंते।यानि च यद्रूपसमनुगतानि तत्स्वभावाव्यक्तकारणकानि यथा मृद्धेमपिंडसमनुगताः
कुंडलमुकुटादयो मृद्धेमपिंडाव्यक्तकारणका इति कारणमस्त्यव्यक्तं भेदानामिति सिद्धं।अव्यक्तं साधयित्वाऽस्य प्रवृत्तिप्रकारमाह।प्रवर्त
ते त्रिगुणतः।कारणमस्त्यव्यक्तं।समुदयाच्च परिणामतः सलिलवत् प्रतिप्रतिगुणाश्रयविशेषात्।१६।प्रतिसर्गावस्था
यां सत्वं रजस्तमश्च सदृशपरिणामानि भवंति।परिणामस्वभावा हि गुणा नापरिणम्य क्षणमप्यवतिष्ठंते।तस्मात्सत्वं स

तद्रूपतया रजोरजोरूपतया तमस्तमोरूपतया प्रतिसर्गावस्थायामपि प्रवर्त्तन्ते। तदिदमुक्तं त्रिगुणत इति। प्रवर्त्तते तस्मादाह समुदयाच्च। समेतोद
यः समुदायः समवायः। समुदयं च गुणानां गुणप्रधानभावमंतरेण संभवति। न च गुणप्रधानभावो वैषम्यं विना। न च वैषम्यमुपमर्द्योपम
र्दकभावादृते इति महदादिभावेन प्रवृत्तिर्द्वितीया। स्यादेतत् कथमेकरूपाणां गुणानामनेकरूपप्रवृत्तिरित्यत आह। परिणामतः सलिल
दि वत्। यथाहि वारिदमुक्तमुदकमेकरसमपि तत्तद्विकारेण नारिकेलतालतालीबिल्वचिरबिल्वामलकप्राचीनामलकतिंदुकक
पित्थफलरसतया परिणमन्मधुराम्ललवणकटुकतिक्तकषायतया विकल्प्यते। एवमेकैकगुणसमुद्भवादसमुद्भवात् प्रधानगुण
13 माश्रित्याप्रधानाः गुणाः परिणामभेदान् प्रवर्त्तयंति। तदिदमुक्तं प्रतिप्रतिगुणाश्रयविशेषात्। एकैकगुणाश्रयेण यो विशेषस्तस्मा
दित्यर्थः। ये तु नौष्टिका अव्यक्तं महांतं वाहंकारं वा इंद्रियाणि वा भूतानि वात्मानमभिमन्यमाना नामस्तान्येवोपासते तान्प्रत्याह। पुरुषोस्ती
ति। संघातपरार्थत्वात् त्रिगुणादिविपर्ययादधिष्ठानात्। पुरुषोस्ति भोक्तृभावात् कैवल्यार्थं प्रवृत्तेश्च। १७। पुरुषोस्त्यव्यक्तादेर्व्यतिरिक्तः।
कुतः संघातपरार्थत्वात्। अव्यक्तमहदहंकारादयः परार्थाः संघातत्वाच्छयनासनवत्। सुखदुःखमोहात्मकतयाऽव्यक्तादयः सर्वे संघाताः स्या
देतत्। शयनासनादयः संघाताः संहतशरीराद्यर्थाः दृष्टांतत्वात्। आत्मानं प्रति परार्थाः। तस्मात् संघातांतरमेव गमयेयुर्नत्वसंहतमात्मानमि
त्यत आह। त्रिगुणादिविपर्ययात्। अयमभिप्रायः। संघातांतरार्थत्वे हि तस्यापि संघातत्वात्तेनापि संघातांतरार्थेन भवितव्यं। एवं तेन तेनेत्यन
वस्थापस्यात्। न च व्यवस्थायां सत्यां प्रव्यवस्थायुक्ता कल्पना गौरवप्रसंगात्। न च प्रमाणवत्वेन कल्पनागौरवमपि मृष्यत इति युक्तं
संघातत्वस्य पारार्थ्यमात्रेणान्वयात्। दृष्टांतदृष्टसर्वधर्मानुरोधेन त्वनुमानमिच्छतः सर्वानुमानोच्छेदप्रसंगः इत्युपपादितं न्या
यवार्त्तिकतात्पर्यटीकायामस्माभिः। तस्मादनवस्थाभियाप्यसंघातत्वमिच्छता त्रिगुणत्वमविवेकित्वमविषयत्वमसामा दृक

न्यत्वं चेतनत्वमप्रसवधर्मित्वं चाभ्युपेतव्यं। त्रिगुणत्वादयो हि धर्माः संहतत्वेन व्याप्ताः। तत्संहतत्वमस्मिन्परे व्यावर्त्तमानं त्रैगुण्यादिव्याव
र्त्तयति। ब्राह्मणत्वमिव व्यावर्त्तमानं कठत्वादि ... व्यावर्त्तयति। तस्मादचार्येण त्रिगुणादिव्यावर्त्तयति। तस्मादाचार्येण त्रिगुणादि
विपर्ययादिति वदतासंहतः परो विवक्षितः सचात्मेति सिद्धं। इतश्चास्ति पुरुषोऽस्त्यधिष्ठानात्। त्रिगुणात्मकानामधिष्ठायमानत्वात्। यद्यत्सु
खदुःखमोहात्मकं तत्सर्वं परेणाधिष्ठायमानं दृष्टं। यथा रथादियंत्रादिभिः। सुखदुःखमोहात्मकं चेदं बुद्ध्यादि तस्मादेतदपि परेणाधिष्ठात
व्यं। सच परस्त्रैगुण्यादन्य आत्मेति। इतश्चास्ति पुरुषः भोक्तृभावात्। भोक्तृभावेन भोग्ये सुखदुःखे उपलक्षयति। भोग्ये हि सुखदुःखेऽनुकूलप्रतिकू
लवेदनीये प्रत्यात्ममनुभूयेते। तेनानयोरनुकूलनीयेन प्रतिकूलनीयेन च केनचिदन्येन च भवितव्यं। न चाऽनुकूलनीयाः प्रतिकूलनीया वा बुद्ध्यादयः
तेषां सुखाद्यात्मकत्वेन स्वात्मनि वृत्तिविरोधात्। तस्माद्योऽसुखदुःखात्मा सोऽनुकूलप्रतिकूलनीयो वा स आत्मेति। अन्ये त्वाहुः भोग्या दृश्या बुद्ध्या ल
दयः। न च द्रष्टारमंतरेण दृश्यता युक्ता तेषां। तस्मादस्ति द्रष्टा दृश्यबुद्ध्याद्यतिरिक्तः सचात्मेति। भोक्तृभावात् द्रष्टृभावात् दृश्येन द्रष्टुरनुमा नीय
नादित्यर्थः। दृश्यत्वं च बुद्ध्यादीनां सुखाद्यात्मकत्वेनानुमितं। इतश्चास्ति पुरुषः इत्याह। कैवल्यार्थं प्रवृत्तेश्च। शास्त्राणां महर्षीणां च यदा
त्यन्तिकदुःखत्रयप्रशमलक्षणं न तद्बुद्ध्यादीनां संभवति हि ते दुःखात्मकाः कथं स्वभावात् वियोजयितुं शक्यंते। तदति
रिक्तस्य तु तदात्मनस्ततो वियोगः शक्यसंपादः। तस्मात्कैवल्यार्थं प्रवृत्तेरागमानां महर्षीणां चास्ति बुद्ध्याद्यतिरिक्त आत्मेति सिद्धं। तदेवं
पुरुषास्तित्वं प्रतिपाद्य स किं सर्वशरीरेष्वेकः किमनेकः प्रतिक्षेत्रमिति संशये तस्य प्रतिक्षेत्रमिति अनेकत्वमुपपादयति। जननमरण
कारणानां प्रतिनियमादयुगपत्प्रवृत्तेश्च। पुरुषबहुत्वं सिद्धं त्रैगुण्यविपर्ययाच्चैव। १८। पुरुषबहुत्वं सिद्धं। कस्मात्। जननमरण न
कारणानां प्रतिनियमात्। निकायविशिष्टाभिरपूर्वाभिर्देहेंद्रियमनोऽहंकारबुद्धिवेदनाभिः संबंधो जन्म न तु पुरुषस्य परिणा

पुरुषस्या।भि

सा राम
सां सांरी

३: १४ मरणस्यापरिमितो लोकात् । तेषामेव च देहादीनां पुत्कालानां परित्यागो मरणं । न त्वात्मनो विनाशस्तस्य कूटस्थनित्यत्वात् । कर
णेनो बुद्ध्यादीनि त्रयोदश । तेषां जननमरणकरणानां प्रतिनियमो व्यवस्था । सा खल्वियं सर्वशरीरेष्वेकस्मिन् पुरुषे नोपपद्य
ते । तदा खल्वेकस्मिन् जायमाने सर्वे जायेरन् । म्रियमाणे च म्रियेरन् । अंधादौ चैकस्मिन् सर्व एवांऽधादयः स्युः । विचित्ते चै
कस्मिन् सर्व एव विचित्ताः स्युः । अस्ति तु व्यवस्था । प्रतिक्षेत्रं तु पुरुषभेदे भवति व्यवस्था । न चैकस्यापि पुरुषस्य देहोपाधिनभे
दाद्व्यवस्थेति युक्तं । पाणिस्तनाद्युपाधिभेदेनापि जननमरणादिव्यवस्थाप्रसंगात् । न हि जोरुके जाते नाशे वा स्तनादौ महसत्वयवेषु पा
वति जीनामृतो वा भवतीति । इतश्च प्रतिक्षेत्रं पुरुषभेद इत्याह । अयुगपत् प्रवृत्तेश्च । प्रवृत्तिः प्रयत्नलक्षणा यद्यप्यंतःकरणनी
प६ नि तथापि पुरुषे उपचर्यते । तथा च तस्मिन्नेकत्र शरीरे प्रयतमाने सर्व एव सर्वशरीरेष्वेक इति सर्वत्र प्रयतेत । ततश्च सर्वाण्येव शरी
राणि युगपच्चलेयुः । नानात्वे च नायं दोष इति । इतश्च पुरुषभेद इत्याह । त्रैगुण्यविपर्ययाच्चैव । एवकारो भिन्नक्रमः । सिद्धमि
त्यस्यानंतरं द्रष्टव्यः । सिद्धमेव नासिद्धं । त्रयो गुणास्त्रैगुण्यं तस्य विपर्ययोऽन्यथाभावः । केचित् खलु सत्वनिकायाः सत्वबहुलाः कुम
प्र्व यथोर्ध्वरे नसः । केचिद्रजोबहुलाः । यथा मनुष्याः । केचित्तमोबहुलाः यथा तिर्यग्योनयः । सोयमिदृशस्त्रैगुण्य
विपर्ययोऽन्यथाभावस्तेषु तेषु सत्वनिकायेषु न भवेद्यद्येकः पुरुषः स्यात् । भेदे त्वयमदोष इति । सर्वपुरुषबहुत्वं प्र
साध्य विवेकज्ञानोपयोगितया तस्य धर्मानाह । तस्माच्च विपर्यासात् सिद्धं साक्षित्वमस्य पुरुषस्य । केवल्यं मा सक
व १४

अविषयत्वं

ध्यस्थ्यं द्रष्टृत्वमकर्तृभावश्च ।१९। तस्माच्चेति चः पुरुषबहुत्वेन सह धर्मान्तराणि समुच्चिनोति । विपर्यासादस्मादुक्ते त्रैगुण्यादिविपर्यासा
दित्यनंतरोक्तं संबध्यते । अतस्त्रिराशार्थं न स्मादित्युक्तं । अनंतरोक्तं हि संनिधानादिदमो विषयो विप्रकृष्टं च तद इति त्रि
गुणमविवेकी सादिसंबध्यते । तस्मात्त्रिगुणत्वाद्यो विपर्यासः पुरुषस्य अत्रिगुणत्वं विवेकित्वं असाधारणत्वं चेतनत्वमप्रस
वधर्मित्वं च । तत्र चेतनत्वेनाविषयत्वेन च साक्षित्वद्रष्टृत्वे दर्शिते चेतनो हि द्रष्टा भवति नाचेतनः । साक्षी दर्शितविषयो भवति
यस्मै दर्शितविषयः स साक्षी । यथा हि लोके र्थिप्रत्यर्थिनौ विवादविषयं साक्षिणे दर्शयतः । एवं प्रकृतिरपि स्वचरितं विषयं पु
रुषाय दर्शयतीति पुरुषः साक्षी न चाचेतनो विषयो वा शक्यो विषयं दर्शयितुं इति चेतनत्वादविषयत्वाच्च भवति साक्षी । अत एव द्रष्टा
पि भवति । अत्रैगुण्याच्चास्य कैवल्यं । आत्यंतिको दुःखत्रयाभावः कैवल्यं तच्चास्य स्वाभाविकादेवात्रैगुण्यात्सुखदुःखमोहरहि
तत्वात्सिद्धं । अत एवात्रैगुण्यान्माध्यस्थ्यं सुखी हि सुखेन तृप्यन् दुःखी दुःखं द्विषन् मध्यस्थो न भवति । न उभयरहितस्तु मध्य
चा. स्थ इत्युदासीन इति चाख्यायते । विवेकित्वादप्रसवधर्मित्वाच्चाकर्तेति सिद्धं । स्यादेतत् प्रमाणेन कर्तव्यमर्थमवगम्य चे
तनोहं चिकीर्षन् करोमीति कृतिचेतन्ययोः सामानाधिकरण्यमनुभवसिद्धं । तदेतस्मिन्मते नावक्लृप्यते चेतनस्याक
र्तृत्वात् कर्तृत्वाच्चैतन्यादित्यत आह । तस्मात्तत्संयोगादचेतनं चेतनावदिव लिंगं । गुणकर्तृत्वे च तथा कर्तेव भवत्युदा
सीनः ।२०। यतश्चैतन्यकर्तृत्वे भिन्नाधिकरणे युक्तितः सिद्धे तस्मात् भ्रांतिरियमित्यर्थः । लिंगं महदादि सूक्ष्म

राम
सां॰ टी
३५

वर्तितं वक्ष्यते। भ्रांतिबीजं तत्संयोगस्तत्संनिधानं मतिरोहितमन्यत्। तत्संयोगादित्युक्तं। न च भिन्नयोः संयोगापेक्षां विना नयेचेंपु
पकार्योपकारकभावं विनेत्यपे क्षाहेतुमुपकारमाह। पुरुषस्य दर्शनार्थं कैवल्यार्थं तथा प्रधानस्य। पङ्ग्वंधवदुभयोरपि
संयोगस्तत्कृतः सर्गः। प्रधानस्येति। कर्मणि षष्ठी। प्रधानस्य सर्वकारणस्य यद्दर्शनं पुरुषेण तदर्थं। तदनेन भोग्यता प्रधानस्य
दर्शिता। ततश्च भोग्यं प्रधानं भोक्तारमंतरेण न संभवतीति युक्तास्य भोक्त्रपेक्षा। पुरुषस्यापेक्षां दर्शयति। पुरुषस्य कैवल्या
र्थं तथा च भोग्येनाहि प्रधानेन संभिन्नः पुरुषस्तद्गतं दुःखत्रयं स्वात्मन्यभिमन्यमानः कैवल्यं प्रार्थयते। तच्च सत्त्वपुरुषा
न्यताख्यातिनिबंधनं। न च सत्त्वपुरुषान्यताख्यातिः प्रधानमंतरेणेति कैवल्यार्थं पुरुषः प्रधानमपेक्षते। अनादित्वाच्च
संयोगपरंपराया भोगाय संयुक्तोपि कैवल्याय पुनः संयुज्यत इति युक्तं। ननु भवतु नभोः संयोगो महदादिसर्गस्तु
कुतस्त्य इत्यत आह। तत्कृतः सर्गः। संयोगो हि न महदादिसर्गमंतरेण भोगाय न च कैवल्याय पर्याप्त इति संयोग एव भोगा
२ पवर्गार्थं सर्गं करोतीत्यर्थः। सर्गक्रममाह। प्रकृतेर्महांस्ततोऽहंकारस्तस्माद्गणश्च षोडशकः। तस्मादपि षोडशकात्पं
चभ्यः पंचभूतानि। प्रकृतिरव्यक्तं। महदहंकारौ वक्ष्यमाणलक्षणौ। एकादशेंद्रियाणि वक्ष्यमाणानि पंचतन्मा
त्राणि च। सोयं षोडशसंख्यापरिमितो गणः षोडशकस्तस्मादपि च षोडशकात्पंचभ्यः सूक्ष्मेभ्यः पंचभ्यस्तन्मा
त्रेभ्यः पंच पंचभूतान्याकाशादीनि। तत्र शब्दतन्मात्रादाकाशं शब्दगुणं शब्दतन्मात्रसहितात्स्पर्शतन्मात्राद्वायुः।
शब्दस्पर्शगुणः। शब्दस्पर्शतन्मात्रसहिताद्रूपतन्मात्रात्तेजः शब्दस्पर्शरूपगुणं शब्दस्पर्शरूपतन्मात्रसह रूपं

नु स
नाहादस्तन्मात्रादयः। शब्दस्पर्शरूपरसगुणाः शब्दस्पर्शरूपरसतन्मात्रैः सहिताद्रसतन्मात्रात्पृथ्वी शब्दस्पर्शरूपरसगंधगुणा
जायंते। अव्यक्तं सामान्यतो लक्षितं तद्विपरीतमव्यक्तमित्यादिति विशेषतश्च सर्वं लक्षणं प्रकाशकमित्यादिना व्यक्तमपि सामान्य
दि तो लक्षितं हेतुमत्यादिना। संप्रति विवेकज्ञानोपयोगितया व्यक्तविशेषं बुद्धिं लक्षयति। अध्यवसायो बुद्धिर्धर्मो ज्ञानं विरा
ग ऐश्वर्यं सात्विकमेतद्रूपं तामसमस्माद्विपर्यस्तं। अध्यवसायो बुद्धिः अध्यवसाय इति क्रियाक्रियावतोरभेदविवक्षया सर्वो
व्यवहर्त्तालोच्य मत्वाहमत्राधिकृत इत्यभिमत्य कर्त्तव्यमेतन्मयेति अध्यवस्यति ततश्च प्रवर्त्तत इति सिद्धं। तत्र योयं क ओक
र्त्तव्यमिति निश्चयः चितिसंनिधानादापन्नचैतन्याया बुद्धेः सोध्यवसायो बुद्धेरसाधारणो व्यापारस्तदभेदाद्बुद्धिः। स च बुद्धि
लक्षणं समानासमानजातीयव्यवच्छेदकत्वात् तदेवं बुद्धिं लक्षयित्वा विवेकज्ञानोपयोगिनस्तस्या धर्मान्सात्विकतामसानाह।
यं धर्मो ज्ञानं विराग ऐश्वर्यं सात्विकमेतद्रूपं तामसमस्माद्विपर्यस्तं। धर्मोभ्युदयनिःश्रेयसहेतुः। तत्र यागदानाद्यनुष्ठानज
नितो धर्मोभ्युदयहेतुः अष्टांगयोगजनितश्च निःश्रेयसहेतुः गुणपुरुषान्यताख्यातिर्ज्ञानं वैराग्यं रागाभावः। तस्य
यतमानसंज्ञाव्यतिरेकसंज्ञैकेंद्रियसंज्ञावशीकारसंज्ञा इति चतस्रः संज्ञाः। रागादयः कषायाश्चित्तवर्त्तिनस्तैरिंद्रिया
णि यथास्वं विषयेषु प्रवर्त्तंते। तन्मा भूत्प्रवर्त्तिषतानि विषयेषु इंद्रियाणीति तत्परिपाचनायारंभः प्रयत्नो यतमानसंज्ञा।
परिपाचने चानुष्ठीयमाने केचन कषायाः पक्वाः पच्यन्ते च केचित् तत्रैवं पूर्वापरीभावे सति पच्यमानेभ्यः कषाये
णा

न्योऽव्यतिरेके नावधारणं पक्वानां व्यतिरेकसंज्ञा। इन्द्रियप्रवर्त्तनसमर्थतया पक्वानां औत्सुक्यमात्रेण मनसि व्यवस्थानमेकेन्द्रियसं
ज्ञा। औत्सुक्यमात्रस्यापि निवृत्तिरूपस्थितेष्वपि दृष्टानुश्रविकविषयेषु या संज्ञा तया स्वराचीनां सर्ववशीकारसंज्ञा यामत्र भगवान्पा
तंजलिर्वर्णयां चकार दृष्टानुश्रविकविषयवैतृष्ण्यवशीकारसंज्ञा वै राग्यमिति। सोयंबुद्धिधर्मो विराग इति ऐश्व
र्यमपि बुद्धिधर्मो यतोऽणिमादिप्रादुर्भावः। तत्राणिमादिभवत्यणुः लघिमा यतो लघुर्भवति यतः सूर्यमरीचिमा
या लंब्य सूर्यलोकं ... ति। महिमा यतो महान्भवति प्राप्तिरंगुल्यग्रेण स्पृशति चंद्रमसं। प्राकाम्यमिच्छानभिघातो यतोऽजानो धा
भूमावुन्मज्जति निमज्जति यथोदके। वशित्वं भूतभौतिकेषु वशी भवत्यवश्यः। ईशित्वं भूतभौतिकानां प्रभवा
ययानामीष्टे यत्र कामावसायित्वं सत्यसंकल्पता। यथास्य संकल्पो भवति भूतेषु तथैव भूतानि भवंति
अन्येषां निश्चया निश्चेतव्यमनुविधीयंते योगिनस्तु निश्चेतव्याः पदार्था निश्चयमिति। चत्वारः सात्त्विका
बुद्धिधर्माः तामसास्तद्विपरीताः अधर्माज्ञानावैराग्यानैश्वर्याभिधानाश्चत्वारः इत्यर्थः। अहंकार
स्य लक्षणमाह। अभिमानोऽहंकारस्तस्माद्द्विविधः प्रवर्त्तते सर्गः। एकादशकश्च गणस्तन्मात्र
पंचकश्चैव। अभिमानोऽहंकारः यत्खल्वालोचितं मतं तत्र माधिकृतः शक्तः खल्वहमत्रम तक्ष

दर्थाः स्वामी विषयाः मत्तो नान्यो ज्ञाध्यिकृतः कश्चिदस्ति अतोऽसहमस्मीति योऽभिमानः सोऽहंकारव्यापारस्तस्मात् अहंकारस्तमु
पजीव्य हि बुद्धिरध्यवस्यति। कर्त्तव्यमेतन्मयेति तस्य कार्यभेदमाह। तस्मात् द्वैविध्यः प्रवर्त्तते सर्गः प्रकारद्वयमाह। एकादश
कश्च गणः इंद्रियाह्वयः। तस्माच्च पंचकश्चैव द्विविध एष सर्गो हंकारात्प्रवर्त्तन्त इत्येवेनावधारयति।२४। स्यादेतत्कथं
पुनरेकरूपादहंकारात्कारणात् प्रकाराशजो विकल्पो भवति इत्यत आह। सात्त्विक एकादशकः प्रवर्त्तते वैकृतादहंकारात् भूतादेः
तन्मात्रः स तामसः तैजसादुभयं। सात्त्विक एकादशकः इति प्रकाशलाघवाभ्यां एकादशेंद्रियगणः सात्त्विको वैकृतात्सात्त्वि
कादहंकारात् प्रवर्त्तते। भूतादेस्त्वहंकारात् तामसात्तन्मात्रको गणः प्रवर्त्तते कस्मात् यतः स तामसः। एतदुक्तं भवति। यद्यप्येको
हंकारस्तथापि गुणभेदोद्भवाभिभवाभ्यां भिन्नं कार्यं करोतीति। ननु यदि सत्त्वतमोभ्यां एव सर्वं कार्यं आरब्धं तर्हि किंचित्
कारेण रजसेत्यत आह। तैजसादुभयं तैजसाद्राजसादुभयं गणद्वयं भवति। यद्यपि रजसो न कार्यांतरमस्ति तथापि स
पे त तमसी स्वयमक्रिये समर्थे अपि न स्वकार्यं कुरुतः रजस्तु चलतया ते चालयति न स्वकार्यं कुरुतः। इत्युभय १
स्मिन्नपि कार्ये सत्त्वतमसोः क्रियोत्पादनद्वारेणास्ति रजसः कारणत्वमिति न व्यर्थं रज इत्यर्थः। सात्त्विकमेका
दशकमाख्यातं तत्र बाह्येंद्रियदशकं तावदाह। बुद्धींद्रियाणि चक्षुःश्रोत्रघ्राणरसनत्वगाख्यानि। वाक्पाणि
पादपायूपस्थान् कर्मेंद्रियाण्याहुः। सात्त्विकाद्धंकारोपादानत्वमिंद्रियत्वं नचक्षुरादीनां पंचबुद्धीन्द्रियं कर्मेंद्रियं पंच।

उभयमेतदिंद्रियस्यालक्षणमित्यहंकारादिंद्रियमिति सूच्यते। तानि च स्वसंज्ञाभिश्चक्षुरादिभिरुक्तानि। तत्र रूपग्रहणलिंगं
चक्षुः शब्दग्रहणलिंगं श्रोत्रं गंधग्रहणलिंगं घ्राणं रसग्रहणलिंगं रसनं स्पर्शग्रहणलिंगं त्वक्। वागादीनां कार्यं
वक्ष्यति। एकादशेंद्रियमाह। उभयात्मकमत्र मनः संकल्पकमिंद्रियं च साधर्म्यात्। गुणपरिणामविशेषान्ना-
नात्वं बाह्यभेदाश्च। एषु एकादशेंद्रियेषु मध्ये मनः उभयात्मकं बुद्धींद्रियं च। चक्षुरादीनां वागादीनां च मनो-
वा धिष्ठितानां स्वविषयेषु प्रवृत्तेः। तदसाधारणरूपेण लक्षयति। संकल्पकमत्र मनः आलोचितमिंद्रियेण व-
स्त्विदमिति संमुग्धमिदमेवं नैवमिति सम्यक्कल्पयति। विशेषणविशेष्यभावेन विवेचयतीति यावत्। यदाहुः। संमु-
ग्धं वस्तुमात्रं तु प्राग्गृह्णंत्यविकल्पितं। तत्सामान्यविशेषाभ्यां कल्पयंति मनीषिणः इति तथा हि। अस्ति ह्यालोचि- प
तं ज्ञानं प्रथमं निर्विकल्पकं बालमूकादिविज्ञानसदृशं शुद्धवस्तुजं। ततः परं पुनर्वस्तु धर्मैर्जात्यादिभिर्य-
या बुद्ध्यावसीयते सापि प्रत्यक्षत्वेन संमतेति। सोयं संकल्पलक्षणो व्यापारो मनसः। समानासमानजातीयाभ्यां
व्यवच्छिंदन्मनो लक्षयति। स्यादेतत्। असाधारणव्यापारयोगी यथा महदहंकारौ नेंद्रियमेवं मनोप्यसाधारणव्या- राग
पारयोगि नेंद्रियं भवितुमर्हतीत्यत आह। इंद्रियं च। कुतः। साधर्म्यात्। इंद्रियांतरैः सात्त्विकाहंकारोपादानत्वं च
साधर्म्यं न तु इंद्रियलिंगत्वं महदादीनामपि आत्मलिंगत्वेन इंद्रियप्रसंगात्। तस्माद्व्युत्पत्तिनिमित्तमात्रमिंद्रिय- रूक
लिंगत्वं न तु प्रवृत्तिनिमित्तं। अथ कथं सात्त्विकादेकस्मादहंकारादेकादशेंद्रियाणीत्यत आह। गुण

परिणामविशेषात् नानात्वं बाह्यभेदाश्च शब्दाद्युपभोगजनकादृष्टसहकारिभेदात्कार्यभेदः। अदृष्टभेदोपि गुणपरिणाम एव।
बाह्यभेदाश्चेति दृष्टान्तार्थं यथा बाह्यभेदस्तद्वदिति। तदेकमेकादशेन्द्रियाणि स्वरूपतउक्त्वा दशानामसाधारणीं वृत्तिमाह
शब्दादिषु पंचानां आलोचनमात्रमिष्यते वृत्तिः। बुद्धीन्द्रियाणां संमुग्धवस्तुमात्रदर्शनमालोचनमुक्तं। वचनादा
नविहरणोत्सर्गानंदाश्च पंचानां। कर्मेन्द्रियाणां कण्ठताल्वादिस्थानमिंद्रियं वाक् स्फुटमन्यत्। अंतःकरणत्रयस्य
वृत्तिमाह। स्वालक्षण्यं वृत्तिस्त्रयस्य सा त्वसाधारणं। लक्षणं येषां तानि स्वलक्षणानि महदहंकारमनांसि तेषां
भावः स्वालक्षण्यं तदेव स्वानि लक्षणान्येव तथा महतो ध्यवसायो हंकारस्याभिमानः संकल्पो मनसो
वृत्तिर्व्यापारः। द्वैविध्यं साधारणत्वमसाधारणत्वाभ्यामाह। सैषा भवत्वसामान्या असाधारणी
सामान्यकरणवृत्तिः प्राणाद्या वायवः पंच। सामान्या वासौ करणवृत्तिश्चेति। त्रयाणामपि करणानां पंच
वायवो जीवनं वृत्तिः। तद्भावभावात्तदभावेऽभावात्। तत्र प्राणो नासाग्रहृन्नाभिपादांगुष्ठवृत्तिः। अपानः कृकाटि
कापृष्ठपार्श्वपायूपस्थवृत्तिः। समानो हृन्नाभिसर्वसंधिवृत्तिः। उदानो हृत्कण्ठतालुभ्रूमध्यमूर्द्धवृत्तिः। व्यानस्त्वग्वृ
त्तिरिति पंच वायवः। असाधारणीषु वृत्तिषु क्रमाक्रमौ कौ प्रत्याह। युगपच्चतुष्टयस्य वृत्तिः। क्रमश
स्तस्य निर्दिष्टा। दृष्टे। यथांधकारे विद्युत्संपातमात्राद्व्याघ्रमभिमुखमिति सन्निहितं पश्यति। तदा त्व
स्यालोचनसंकल्पाभिमानाध्यवसाया युगपदेव भवंति। यत्र त्वतः लुसस्थानादेकपदे
सा

राम
सां·टी
१८
श

।अपसरति।क्रमशश्च यथा लोके पथि मंदालोके तावद्वस्तुमात्रं संमुग्धमालोकयति।अथ प्रणिहितमनाः कर्णान्ताकृष्टश
रः संकुचितपादो वरोपितमंडलीकृतकोदंडप्रचंडतरः पातयत्येष शरं यमिति निश्चिनोति।अथ च मां प्रत्येतीत्यभिमन्यते।अध्य
वस्यति अपसरामीति ततः स्थानादिति परोक्षे तु अंतःकरणत्रयस्य बाह्येंद्रियवर्जं वृत्तिमाह। यथाप्यदृष्टे त्रयस्य तत्पूर्वि
का वृत्तिः।अंतःकरणत्रयस्य युगपत्क्रमेण च वृत्तिः दृष्टपूर्विके वा अनुमानागमस्मरणयोहि परोक्षे दर्शनपूर्वा प्रवर्त्तते।नान्य
था यथा दृष्टे तथाऽदृष्टेपीति।योजना।स्यादेतत्।चतुर्णां करणानां वा वृत्तयो न तावन्मात्राधीनाः तेषां सदातनत्वेन वृत्ती
नां सदोत्पादप्रसंगात्।आकस्मिकत्वे तु वृत्तिसंकरप्रसंगे नियमहेतोरभावादित्यत आह। स्वां स्वां प्रतिपद्यन्ते परस्प
य राकूतहेतुकां वृत्तिं करणानि त्वं केताः परस्परायस्वकादोऽप्रवृत्तावप्यन्यतमस्याकूतमवगम्यान्यतमः प्रवर्त्तते।प्रवर्त्तमानः
शाक्तिकः शाक्तिमेवादत्ते न यष्ट्यादिकं।एवं याष्टिको विपक्षमेव न तनुत्राणादिकं।न चान्यतमस्याकूतेन स्वाकूता
त्स्वकार्यकरणाभिमुख्यादन्यतमस्य करणं प्रवर्त्तते।न स्वयं तेन हेतुमत्त्वान्न वृत्तिसंकर इत्युक्तं।स्वां स्वां प्रतिपद्य
त इति स्यादेतत्।याष्टिकादयश्चेतनत्वाच्चिरस्पराकूतमवगम्य प्रवर्त्तंत इति युक्तं।करणानि तु अचेतनानि त
स्मान्नैवं प्रवर्त्तितुमर्हंतीतेनैषामधिष्ठात्राकरणानां स्वरूपसामर्थ्योपयोगाभिज्ञेन भवितव्यमत आ
ह।पुरुषार्थ एव हेतुर्न केनचित्कार्यते करणं।भोगापवर्गलक्षणः पुरुषार्थ एवानागतावस्थः प्रवर्त्तयति करणा कृष्ण
नि कृतमत्र न त्वस्वरूपाद्यभिज्ञोकर्त्रा। [illegible] मित्यो से पपादयिष्यते।। १८

न केनचिन्न कार्यते करणमिस्फुटं। तत्र करणं विभज्यते। करणं त्रयोदशविधं। इति नाम्ने कोशाव श्चाहंकारेश्चेति। त्रयोद
शप्रकारं करणं त्रयोदशविधं। इति द्विनीयपाल्येकादश बुद्ध्यहंकारौ चेति। त्रयोदशप्रकारं करणं कारकविशेषः। न च
व्यापारावेशं विना कारकत्वमिति। व्यापारमाह। तदाहरणधारणप्रकाशकरं। यथायथं तत्र कर्मेन्द्रियाणि वाग्यादीनि आह
रंति यथास्वमुपाददते। स्वव्यापारेणमाप्नुवंतीति यावत्। उद्ध्वअहंकारमनांसि तु स्ववृत्त्या प्राणादिलक्षणया धारयंति।
बुद्धीन्द्रियाणि प्रकाशयंति। आहरणादिक्रियाणां सकर्मतया किंकर्मकमिति विधं चेति अत आह। कार्यं च तस्य त्रयोदश
विधस्य करणस्य दशधा हार्यं धार्यं प्रकाश्यं च। आहार्यं व्याप्यं कर्मेन्द्रियाणां वचनादानविहरणोत्सर्गानंदाः। यथास्वं व्या
प्याः ते च दिव्यादिव्यतया दशधा हार्यं दशधा। एवं धार्यमपि अंतःकरणत्रयस्य प्राणादिलक्षणतया स्वस्य शरीरं
तच्च पार्थिवादिः शब्दादीनां पंच ... तानां समूहः। ते च पंच दिव्यादिव्यतया दशेति। धार्यमपि दशधा। एवं बुद्धीन्द्रियाणां प्र
काश्यं। दशधेति। त्रयोदशविधे करणे अवांतरविभागं करोति। अंतःकरणं त्रिविधं बुद्धिरहंकारो मन इति। शरीराभ्यंत ये
रवर्तित्वात् अंतःकरणं दशधा बाह्यमिन्द्रियं त्रयस्यांतःकरणस्य विषयाख्यं विषयमाख्याति विषयानिश्चयाभि
मानाध्यवसायेषु कार्येषु द्वारीभवति। तत्र बुद्धीन्द्रियाणि आलोचनात् कर्मेन्द्रियाणि तु यथास्वव्यापारेण धं
बाह्याभ्यंतरयोः कारणयोर्विशेषमाह। सांप्रतकालं बाह्यं त्रिकालमाभ्यंतरं करणं। सांप्रतकालं वर्तमानं

सां॰टी॰ कालं बाह्येंद्रियं वर्त्तमानं समीपमनागतमतीतं किमपि वर्त्तमानं तौ अवागपि वर्त्तमानविषया भवति। त्रिकालमंतरंक
३९ रणं तं घटा। नदीदूरभेदैः ॐ षिः। अलिधूमादग्निरिह नमनि कुंजे। अमरूपघातके विलेघि कीटकेऽपि पि
पीलिकांशसंचाराद्वृष्टिर्भविष्यति दृष्टिः। तदनुरूपान्वयं के स्याभिमानाध्यवसायाभावं ति। कालश्च वैशेषिकाभिमत
उ त एको नानागतादिव्यवहारभेदं प्रवर्त्तयितुमर्हति। तस्मादयं यैरुपाधिभेदैरनागतादिभेदः प्रतिपद्यंते संतु तए
वोपाधयोऽप्यनागतादिव्यवहारहेतवः कृतमंतर्गडुना कालेनेति सांख्याचार्याः। तस्मान्न कालरूपतत्वांतराभ्युपगम इति। सां
प्रतकालानां बाह्येंद्रियाणां विषयं विवेचयति। बुद्धींद्रियाणि तेषां पंच विशेषाविशेषविषयाणि तेषां दशानामिंद्रियाणां मध्ये
बुद्धींद्रियाणि पंच विशेषाविशेषविषयाणि विशेषाः स्थूलाः शब्दादयः। शांतघोरमूढाः पृथिव्यादिरूपाः अविशेषा
स्तन्मात्राणि सूक्ष्माः शब्दादयः। मात्रग्रहणेन पृथ्व्यादिभावं व्यपाकरोति। विशेषाश्चाविशेषाश्च विशेषाविशेषाः
त एव विषयो येषां बुद्धींद्रियाणां तानि तथोक्तानि। तत्रोर्ध्वरेतसां योगिनां च श्रोत्रं शब्दतन्मात्रविषयं स्थूलशब्दवि
षयं च। अस्मदादीनां स्थूलशब्दविषयमेव। एवं तेषां त्वक् स्थूलसूक्ष्मस्पर्शविषया अस्मदादीनां स्थूलस्प
र्शविषया। एवं चक्षुरादयोऽपि तेषामस्मदादीनां च रूपादिस्थूलसूक्ष्मेषु द्रष्टव्याः। एवं कर्मेंद्रियेषु मध्ये वाग्भव
ति। स्थूलशब्दविषया तद्धेतुत्वात्। न तु शब्दतन्मात्रस्याहंकारहेतुत्वेन वागिंद्रियेण सहैककार सख
णत्वात्॥ ३९

शेषाणि तु चत्वारि वाक्पाणिपादपायूपस्थानि पंचविषयाणि पाण्याग्राह्याणां घटादीनां पंचशब्दाद्यात्मकत्वात्। सांप्रतं त्रयोद
शसु करणेषु केषांचिद्गुणभावं केषांचित्प्रधानभावं सहेतुकमाह। सान्तःकरणा बुद्धिः सर्वं विषयमवगाहते यस्मात्
तस्मात्त्रिविधं द्वारि द्वाराणि शेषाणि। द्वारि प्रधानं शेषाणि करणानि वाह्येन्द्रियाणि द्वाराणि तैरुपनीतं मनोऽहंकार
बुद्धिः सर्वं यस्माद्विषयमवगाहते। अध्यवस्यति तस्माद्वाह्येन्द्रियाणि द्वाराणि द्वारवती च सान्तःकरणा बुद्धिः। न केवलं वाह्ये
न्द्रियाणि अपेक्ष्य प्रधाना बुद्धिरपि तु ये अपि अहंकारमनसी द्वारिणी ते अप्यपेक्ष्य बुद्धिः प्रधानमित्ये[illegible]ह। एते प्र
दीपकल्पाः परस्परविलक्षणाः गुणविशेषाः कृत्स्नं पुरुषस्यार्थं प्रकाश्य बुद्धौ प्रयच्छन्ति। यथाहि। अमाध्यंनः कुटुंविके
भ्यः करमादाय विषयाध्यक्षाय प्रयच्छन्ति। विषयाध्यक्षश्च सर्वाध्यक्षाय सर्वभूपाय तथा वाह्येन्द्रियाणि आलोच्य मन
सि समर्पयन्ति। मनश्च संकल्प्याहंकाराय अहंकारश्चेति। गुणविशेषाः गुणानां सत्वरजस्तमसां विकाराः परस्परं
विरोधशीलाः अपि पुरुषार्थेन भोगापवर्गरूपेण एकवाक्यतां नीताः। यथा वर्तितैलवह्नयस्तमसोऽपनयनेन रूपप्रकाशा
य मिलिताः प्रदीपाः एवमेते गुणविशेषा व्याख्याता इति योजना। कस्मात्पुनर्बुद्धौ प्रयच्छन्ति ने तु बुद्धिरहंकाराय द्वारिणे मनसे वे
त्यत आह। सर्वं प्रत्युपभोगं यस्मात्पुरुषस्य साधयति बुद्धिः। सैव च विशिनष्टि पुनः प्रधानपुरुषान्तरं सूक्ष्मं। पुरुषार्थस
प्रयोजकत्वात्। तस्य साक्षात्साधनं तत्प्रधानं बुद्धिश्चास्य साक्षात्साधनं तस्मात्सैव प्रधानं यथा सर्वाध्यक्षः।

रा म

सां·दी साक्षाद्ग्राह्यार्थसाधनतया प्रधानमितरे तु ग्रामाध्यक्षादयः तमिति गुणभूताः बुद्धिर्हि पुरुषस्य सान्निध्यात्तच्छायापत्त्या तद्रूपेव
सर्वविषयोपभोगं यस्मात्पुरुषस्य साधयति सुखदुःखानुभवो भोगः स च बुद्धौ बुद्धिश्च पुरुषरूपेवेति पुरुषमुपभो
२० जयति। यथालोचनसंकल्पाभिमानास्तु स्वरूपपरिणाम्यवसायेन सह व्यापारीभवंति। यथा स्वसैन्येन ग्रामाध्य
क्षादि सैन्यं सर्वाध्यक्षस्य भवति सर्वं शब्दादि प्रतिप उपभोगः पुरुषस्य तं साधयति। आलोचनसंकल्पाभि
मानास्तु स्वरूपपरिणामेन उक्ताः उपसंक्रान्ताः सा पश्चात् प्रधानपुरुषयोरंतरं विशेषं विशिनष्टि करोतीति यथौ
दनपाकं पचतीति। करणं प्रतिपादनं अनेनापवर्गपुरुषार्थो दर्शितः। न देवं करणानि विभज्यतानि सूक्ष्माणि। नन्वे
षां शब्दाद्युपभोगयोग्या विशेष इति मात्रशब्दस्यार्थः। अविशेषानुक्त्वा विशेषान्वक्तुमुक्तमिति मेध्यामाह। ते
त भ्यो भूतानि पंचभ्यः त्रिभ्यः मात्रेभ्यो यथासांख्यमेकद्वित्रिचतुःपंचभ्यो भूतानि आकाशानिलानलसलिला
वनिरूपाणि पंचभ्यस्तन्मात्रेभ्यः अस्त्वेतेषां भूतानां कुसमिति विशेषेषु किमायातमित्यत आह। एते स्मृता विशेषाः
कुतः शांता घोराश्च मूढाश्च — एको हेतो द्वितीयः समुच्चये यस्मादाकाशादिषु स्थूलेषु सत्त्वप्रधानतया केचिच्छांताः सु सस्त
खाः प्रकाशा लघवः केचिद्रजःप्रधानतया घोराः दुःखा न त्वनवस्थिताः केचित्तमःप्रधानतया मूढा विषण्णा गु २०

६

रवः । ते ऽपि परस्परव्यावृत्तानुभूयमाना अविशेषाद् इति च सूक्ष्मा इति चोच्यंते । विशेषाणां अवांतरविशेषव्यापारमाह । त्रिधा विशेषा

स्युः । न्विशेषाद् इति प्रकारान्तरमाह । सूक्ष्माख्या मातापितृजा सह प्रभूतैः सूक्ष्मदेहा मातापितृजाः षाट्कौशिकाः तत्र मातृतो लो

मलोहितमांसानि पितृतः स्नाय्वस्थिमज्जान इति षट्कोशाः प्रभूतानि महांति च भूतानि तैः सह सूक्ष्मशरीरमेको विशे

षः । मातापितृजत्वं द्वितीयः महाभूतानि च तृतीयः महाभूतेन घटादीनां निवेशाद् इति सूक्ष्ममातापितृजत्वं द्वितीयः महाभूतानि

च तृतीयः महाभूतेन घटादीनां निवेशाद् इति सूक्ष्ममातापितृजयोर्द्वाहयोर्विशेषमाह । सूक्ष्मास्तेषां विशेषाणां मध्ये

सूक्ष्मा ये ते नियता मातापितृजा निवर्तन्ते रसान्ताः भास्मान्ता विडन्ता वा । सूक्ष्मशरीरं विभजते पूर्वोत्पन्नं । प्रधानेनादि ६

सर्गे प्रतिपुरुषमेकैकमुत्पादितं अशक्तमव्याहतं शिलामप्यनुविशति नियतं चादिसर्गादामहाप्रलयादवतिष्ठते । मह

दादि सूक्ष्मपर्यंतं महदहंकारैकादशेंद्रियपंचतन्मात्रपर्यंतमेतेषां समुदायः सूक्ष्मशरीरं शांतघोरमूढैरिंद्रियैर

न्वितत्वात् विशेषः । नन्वस्त्वेतदेव शरीरं भोगायतनं कृतं दृश्यमानेन षाट्कौशिकेन शरीरेणेत्यत आह । संसरति तु

पभ्रंशुपात्तं षाट्कौशिकं शरीरं वि जहायहायं चापादत्ते । कस्मान्निरूपभोगं तस्मात् सूक्ष्मं शरीरं संसरति । ननु

धर्माधर्मनिमित्तः संसारः । न च सूक्ष्मशरीरस्यास्ति तद्योगः । तत्कथं संसरतीत्यत आह । भावैरधिवासितं धर्मा ।

पतः षाट्कौशिकं विना सूक्ष्मं शरीरं निरूपभोगं

साम र

सां-दी धर्मज्ञानाज्ञानवैराग्यावैराग्यैश्वर्यानैश्वर्याणि भावाः तदन्विता बुद्धिः तदन्वितं च सूक्ष्मशरीरमिति। तदधिभावैरधिवासि
२१ तं यथा सुरभिचंपकसंपर्कात् वस्त्रं तदामोदवासितं भवति। तस्माद्भावैरधिवासितत्वात्संसरति। कस्मात्पुनः प्रधा
नमिव महाप्रलयेपि तच्छरीरं न तिष्ठतीत्यत आह। लिंगं। लयं गच्छतीति लिंगं हेतुमत्त्वेनास्य लिंगत्वमिति भावः। स्या
तं देतत्। बुद्धिरेव साहंकारेंद्रिया कस्मान्न संसरति। किं सूक्ष्मशरीरेण प्रसाधनेनेत्यत आह। चित्रं यथा आश्रयमृते स्थाण्वादिभ्यो
विना यथा छाया। तद्वद्विना विशेषैर्न तिष्ठति निराश्रयं लिंगं। लिंगनाल्लापनात् बुद्ध्यादिरेव लिंगं तदनाश्रयं न तिष्ठति। जन्मप्राप्ता
न्यात्क्वे बुद्ध्यादयः प्रत्यग्जशरीराश्रयाः प्रत्यग्जन्य पंचतन्मात्रत्वे सति बुद्ध्यादित्वात् इदं यथा मानशरीरवर्त्तिबुद्ध्यादिवत्। विनावि
शेषैरिति सूक्ष्मशरीरैरित्यर्थः। आगमश्चात्र भवति। अंगुष्ठमात्रं पुरुषं निश्चकर्ष यमो बलादिति अंगुष्ठमात्रत्वेन सूक्ष्मशरी
ख्या रस्य मुपलक्ष्यते आत्मनो निष्कर्षासंभवात्। सूक्ष्मशरीरमेव पुरुषस्तदपि तु न स्थूलशरीरे शेते इति पुरि शेते इति पुरुषः। एवं सू
क्ष्मशरीरस्यास्तित्वमुपपाद्य यथा संसरति येन च हेतुना तदुभयमाह। पुरुषार्थहेतुकमिदं निमित्तनैमित्तिकप्रसंगेन प्र
सतेर्विभुत्वयोगान्नटवद्व्यवतिष्ठते। लिंगं पुरुषार्थेन हेतुना प्रयुक्तं। निमित्तं धर्मादि। नैमित्तिकं तेषु तेषु निकायेषु प
ट्कौशिकशरीरग्रहः। स हि धर्मादिनिमित्तप्रभवः। निमित्तं च नैमित्तिकं च तत्र यः प्रसंगः प्रसक्तिः। तथा नटवद्व्यवतिष्ठ
ते लिंगं सूक्ष्मशरीरं यथा हि नटस्तां तां भूमिकां विधाय परशुरामो वा अजातशत्रुर्वा वत्सराजो वा भवति। तद्वत्स्थूल सूक्ष्म
२१

शरीरग्रहणेन देवो मनुष्यो पशुर्वा वनस्पतिर्वा स्यात् सूक्ष्मशरीरमिमर्थं कुतः पुनः सो ... मिमहे समन आह प्रकृतेर्विभुत्व
योगात् नटवत् यथा नटः ... रूपाणि धारयति ... इति निमित्तनैमित्तिकप्रसंगेन ... निमित्तं नैमित्तिकं वि
भजते। सांसिद्धिकाः स्वभावाः प्राकृतिकाः स्वाभाविकाः ... प्रादुर्भूता इति × वैकृतिकाश्च ... धर्माद्याः। सांकरणा
स पित्तः। कार्याश्रयिणश्च कललाद्याः वैकृतिकाः ... प्राकृतिकाः × भावाः सांसिद्धिकाः तथा च सर्गादावादिविद्वा
न् तत्र भगवान् कपिलो महर्षिर्धर्मज्ञानवैराग्यैश्वर्यसंपन्नः प्रादुर्भूत इति स्मरन्ति नैसर्गिकाश्च भावाः। असांसिद्धिकाश्च ये
यो उपायानो सञ्जाताः यथा सनन्दनसनत्कुमार... महर्षीणां एवं ... × प्रकृतेः × वैराग्यं ... ऐश्वर्यं ... कार्य शरीरं तदाश्रित्य कल
लाद्यवस्थाः कललबुद्बुदमांसपेशीकण्डराप्रसंगव्यूहा गर्भस्थस्य संभवन्ति। ततो विनिर्गतस्य ततो बाल्यकौमारयौवन
वार्धकादीनि ... निमित्तनैमित्तिक ... निमित्तनैमित्तिकप्रसंगमपि ... आह। धर्मेण गम
नमूर्ध्वं ... लोकेषु गमनं ... धर्मेण ... आदिषु ज्ञानेन चापवर्गः। तावदेव प्रकृतिर्भोगमारभते।
न यावद्विवेकख्यातिं करोति। अथ विवेकख्यातौ सत्यां कृत ... विवेकख्यातिमंतं पुरुषं प्रति निवर्तते। यथा
क्तः। विवेकख्यातिपर्यंतं यावत् प्रकृतिश्चेष्टितमिति। विपर्ययात् अज्ञानाद् इष्यते बन्धः। स च त्रिविधः। प्राकृति

बं

राम
सां॰ टी
२२

को वैकृतिको दाक्षिणिकश्चेति। तत्र प्रकृतावात्मज्ञानाद्ये प्रकृतिमुपासते। तेषां प्राकृतिको बंधः। यः पुराणे प्रकृतिलयान् प्रती
दमुच्यते पूर्णं शतसहस्रं तु तिष्ठंत्यव्यक्तचिंतका इति। वैकारिको बंधस्तेषां ये विकारानेव भूतेंद्रियाहंका
र पुरुषबुद्ध्योपासते तान् प्रतीदमुच्यते दश मन्वंतराणीह तिष्ठंतींद्रियचिंतकाः। भौतिकास्तु शतं पूर्णं सहस्रं त्वाभिमा
निकाः बौद्धा दश सहस्राणि तिष्ठंति विगतज्वराः। ते खल्वमी विदेहा येषां वैकृतिको बंधः। इष्टापूर्त्तेन दाक्षिणिकः पुरुषतत्त्वा
नभिज्ञो हीष्टापूर्त्तकारी कामोपहतमना बध्यत इति। वैराग्यात्प्रकृतिलयः। पुरुषतत्त्वानभिज्ञस्य वैराग्यमा
त्रात्प्रकृतिलयः। प्रकृतिग्रहणेन प्रकृतिमहदहंकारभूतेंद्रियाणि गृह्यंते तेष्वात्मबुद्ध्योपास्यमानेषु लयः। सं धः
सारो भवति राजसाद्रागात्। राजसादिति रागेण रजसो दुःखत्वात्संसारस्य दुःखहेतुता सूच्यते। ऐश्वर्यादविघा
त इच्छाया ईश्वरो यदेवेच्छति तत्करोतीति। विपर्ययात्तद्विपर्ययः। अनैश्वर्यात्सर्वत्रेच्छाविघात इत्यर्थः। बुद्धि
धर्मान्धर्मादीनष्टौ भावान् समासव्यासाभ्यामुक्त्वा हेयोपादेयावगमाय ... तु प्रथमं तावत्समास
माह। एष प्रत्ययसर्गो विपर्ययाशक्तितुष्टिसिद्ध्याख्यः। प्रतीयतेऽनेनेति प्रत्ययो बुद्धिः। तस्य सर्गस्तत्र वि
पर्ययोऽज्ञानमविद्या सापि बुद्धिधर्म एव। तत्र विपर्ययाशक्तितुष्टिषु यथायोगसंयोगतो धर्मादी
नां ज्ञानवर्जमंतर्भावः सिद्धौ च ज्ञानस्य। तस्य भेदाश्च पंचाशत्। कस्माद्गुणवैषम्य

२२

व

विमर्दोत्थ। गुणानां वैषम्यं एकैकस्याधिक्यवलत्वाद्द्वयोर्द्वयोर्वा एकैकस्य चोनबलत्वाद्द्वयोर्द्वयोः कयोर्वा तेन च न्यूनाधिकमं
दमध्याधिमात्रतया यथा कार्यमुन्नीयते तदिदं गुणानां वैषम्यं तेनोपमर्दः एकस्य न्यूनस्य द्वयोर्द्वयोर्वाभिभावः। तस्मात्तस्य
श भेदाः पंचाशद्भिदा न गणयति। पंच विपर्ययभेदा भवन्त्यशक्ति— करणवैकल्यात्। अष्टाविंशतिभेदो तुष्टिर्नवधा स्यादष्टधा सि
द्धिः। अविद्याऽस्मितारागद्वेषाभिनिवेशा यथासंख्यं तमो मोहमहामोहतामिस्रमहमंधता। मिस्रसंज्ञा अविद्यकाः
पंच विपर्ययविशेषाः। विपर्ययप्रभावानामस्मितादीनामविपर्ययस्वभावात्। यद्यप्यविद्यायाविद्या विपर्ययेन कार्यते
यद्यस्मितादयस्तत्स्वभावाः संतस्तदभिनिविशंते। अत एव पंचपर्वाविद्येत्याहुः। वागएपः संप्रति पंचानां
विपर्ययभेदानामवांतरभेदमाह भेदस्तमसोऽविद्याया अष्टविधः। अष्टस्वव्यक्तमहदहंकारपंचतन्मात्रेष्वा
त्मख्यातिबुद्धिरविद्या तमः अष्टविधविषयत्वादष्टविधत्वं। मोहस्य यात्राप्यष्टविधो भेद इति। येनानुषज्यते देवा ह्य
णिमद्यैश्वर्यमासाद्यामृताभिमानिनोऽणिमादिकमात्मीयं नस्वस्तिकमभिमन्यंत इति। सेयमस्मिता मोहोऽष्ट
विधैश्वर्यविषयत्वादष्टविधः दशविधो महामोहः। शब्दादिषु पंचसु दिव्यादिव्यतया दशविधेषु रंजनेषु रागआस
क्तिर्महामोहः। स च दशविषयकत्वाद्दशविधः। तामिस्रो द्वेषो अष्टादशधा शब्दादयो दश विषया रंजनीयाः स्व
रूपतः ऐश्वर्यमणिमादिकं म स्वरूपतो रंजनीयं किं तु रंजनीयाः शब्दादयस्तु पायास्ते च ये शब्दादयः उपस्थि

ताः परस्परेणोपहन्यमानास्तदुपायाश्चाणिमादयः । स्वरूपेणैव कोपनीयाः भवंतीति शब्दादिभिर्दशभिः सहाणिमाद्यष्टकम
ष्टादशविधा इति तद्विषयो द्वेषः तामिस्रोऽष्टादशधेति । तथा भवं संधा नास्ति अभिनिवेशाश्चास सत्त्वे सनेनाष्टादशधेस षड्पंते ।
देवाः खल्वणिमादिकमासाद्य दशशब्दादीन्भुंजानाः शब्दादयो भोग्याः तदुपायाश्चाणिमादयो स्माकमसुरादिभिर्माघानि
व षंतेति बिभ्यति तदिदं भयमभिनिवेशोऽन्धतामिस्रोऽष्टादशविषयत्वात् । अष्टादशधेति सोयं पंचविपर्ययोऽवांतरभेदात् द्वा
षष्टिरिति तदेवं पंचविपर्ययभेदानुक्त्वाऽष्टाविंशतिभेदामशक्तिमाह । एकादशेंद्रियवधाः बाधिर्यं कुष्ठितांधत्वं जडताऽजि ध
तथा तोघ्रं तं मूकता कौण्यपंगुत्वं क्लैब्योदावर्तमत्तता यथासंख्यं श्रोत्रादीनामिंद्रियाणामवधीः । एतद्धेतुकाबुद्धेरशक्तिश्च
स्वव्यापारे भवंति । तथा चैकादशहेतुत्वादेकादशधा बुद्धेरशक्तिः उच्यते हेतुहेतुमतोरभेदविवक्षया च सामानाधिकर
श ण्यं । तदेवमिंद्रियवधद्वारेण बुद्धेरशक्तिमुक्त्वा स्वरूपतोऽशक्तीराह । सहबुद्धिबधैरिति । कति स्वभावतो बुद्धिबधा इत्यत आह ।
सप्तदशधा च बुद्धेः कुतो विपर्ययात् । तुष्टिसिद्धीनां तुष्टयो नवधेति । तद्विपर्ययास्तन्निरूपणा नवधा भवंति । एवं
सिद्धयोऽष्टाविति । तद्विपर्ययास्तन्निरूपणा अष्टौ भवंतीति । तुष्टिर्नवधेत्युक्तं ताः परिगणयति । आध्यात्मिकाश्चतस्रः
प्रकृतिव्यतिरिक्त आत्मास्तीति प्रतिपद्य तस्य श्रवणमननस्तः । विवेकसाक्षात्कारायतु । तदुपदेशात् तुष्टयोनप्रवृत
तेन तस्य चतस्रः आध्यात्मिकास्तुष्टयो भवंति । प्रकृतिव्यतिरिक्तमात्मानमधिकृत्य यास्तस्य प्रस्य यत्ताश्चाध्या वक्ष
त्मिकास्ताः साह । प्रकृत्युपादानकालभाग्याख्याः । प्रकृत्याद्याः
का

राख्या यासां नामान्योक्ताः तत्र प्रकृत्याख्या तुष्टिर्यथा कस्यचिदुपदेशोऽविवेकसाक्षात्कारो हि प्रकृतिपरिणामभेदस्तं च प्रकृति
रेव करोतीति कृतं ते ध्यानाऽभ्यासेनातस्मादेवमेवास्व वत्सेति सेयमुपदेष्टव्यस्य शिष्यस्य प्रकृतौ तुष्टिः प्रकृत्याख्या तु
ष्टिः अत्र उच्यते । या तु प्रकृत्यपि विवेकख्यातिर्न प्रकृतिमात्राद्भवति । माभूत्सर्वस्य सर्वदा तन्मात्रस्य सर्वान्प्रत्यविशेषात् । प्र
व्रज्यायास्तु भवति । तस्मात्प्रव्रज्यामुपाददीथाः कृतं ते ध्यानाभ्यासेनायुष्मन्नित्युपदेशे तुष्टिः सोपादानाख्या सलिलमुच्य
ते । या तु प्रव्रज्यापि न सद्यो निर्वाणदेति सवै कालपरिकप्रोमपेक्ष्य सिद्धिं ते विधास्यत्यलमुत्तापयातवेत्युपदेशे तुष्टिः सा
कालाख्या -- घ उच्यते । या तु न कालान्नाप्युपादानान्न विवेकख्यातिः अपि तु भाग्यादेव । अत एव मदालसापत्यानि बालानि
मातुरुपदेशमात्रादेव विवेकख्यातिमन्ति मुक्तानि च भूवुः । तद्भाग्यमेव हेतुर्नान्य इत्युपदेशात् ते तुष्टिः सा भाग्याख्योच्यते । बाह्या
ना दर्शयति । बाह्यास्तुष्टयो विषयोऽपरमास्पंचयाः खल्वनात्मानः प्रकृतिमहदहंकारादीनात्मेत्यभिमन्यमानस्य वैराग्ये सति तु
ष्टयस्ता बाह्याः । आत्मोक्षानाभावेऽनात्मानमधिकृत्य प्रवृत्तेरिति । ता अभ्यवैराग्ये सति तुष्टय इति वैराजहेतुपंचकाद्देराशा । निपं
च तत्वात्तुष्टयः पंचेति । उपर — मेऽनेनेति उपरमो वैराग्यं विषयादुपरमो वैराग्यं विषयादुपरमः विषयाभोग्यात्राद्याद्यः
पंच उपरमा अपि पंच तथाहि अर्जनरक्षणक्षयभोगहिंसादोषदर्शनजन्मान उपरमाः पंच भवंति । तथापि से ६
वादयो धनार्जनोपायास्ते च सेवकादीनां दुःखाकरं कुर्वंति । दव्यक्तद्वरीश्वरद्वास्थचंडचंडदुर्दुर्दंडआवेदनीभावय

न्नाशः सेवादयो विसर्जिताः एवमन्येप्यर्जनोपाया दुःखाद इति विषयोपरमे या तुष्टिः सैकापारमुच्यते तथा महता प्रयासेनार्जितं भुज्यमानं
क्षीयत इति तत्क्षयं भावयतो विषयोपरमे या तुष्टिः सा तृतीया। पारं पारमुच्यते। एवं शब्दादिभोगाभ्यासाद्वर्द्धन्ते कामास्तेच
विषयाप्राप्तौ कामिनं दुःखयन्तीति भोगदुःखं भावयतो विषयोपरमे या तुष्टिः सा चतुर्थी स्वनुत्तमांभ उच्यते। तदेवमा
ध्यात्मिकाभिश्चतसृभिर्बाह्यादिभिश्च पंचभिर्नव तुष्टयोभिमताः गौणमुख्यभेदात्सिद्धीराह। ऊहः शब्दोध्ययनं दुः
खविघातास्त्रयः सुहृत्प्राप्तिः दानं च सिद्धयोऽष्टौ। सिद्धेः पूर्वोंकुशस्त्रिविधः। विहन्यमानदुःखत्रयत्वात्तद्विघातास्त्रय
इति इमा मुख्यास्तिस्रः सिद्धयः। तदुपायतया त्वितरा गौण्यः पंचसिद्धयः। ता अपि हेतुहेतुमत्तया व्यवस्थिताः। तत्रा
ध्ययनं सिद्धिहेतु रूक्षं त्यारेवा मुख्यास्तु सिद्धयो हेतुमत्स एव मध्यमास्तु हेतुहेतुमत्सः विधिवद्गुरुमुखादध्यात्मवि
द्यानामक्षरस्वरूपग्रहणमध्ययनं प्रथमा सिद्धिस्तारमुच्यते। तत्कार्यं शब्दः। शब्द इति शब्दजनितमर्थज्ञानमुपल
क्षयति। कार्ये कारणोपचारात्। सा द्वितीया सिद्धिः। सुतारमुच्यते। ऊहस्तर्कः आगमाविरोधिन्यायेनागमार्थपरी
क्षणं संशयपूर्वपक्षनिराकरणेनोत्तरपक्षव्यवस्थापनं। तदिदं मननमाचक्षते। आगमिनः सा तृतीया सि
सिद्धिस्तारतारमुच्यते। सो प्रेक्षं मननमेवासुहृत्प्राप्तिः। सुहृत्संमतमिति द्वितीयं मननमाह। न्यायेन स्वयंपरी
क्षितमर्थं न संदधते। न यावद्गुरुशिष्यसब्रह्मचारिभिः संवाद्यते। अतः सुहृदां गुरुशिष्यसब्रह्मचा

रिली संवादकानां प्राप्तिः सुहृत्प्राप्तिः सा सिद्धिः चतुर्थी रम्यकमुच्यते। दानं च शुद्धिर्विवेकज्ञानस्य दैप् शोधन इत्यस्माद्धा
तोः दानपदव्युत्पत्तेः यथाहुर्भगवान्पतंजलिः। विवेकख्यातिरविप्लवा हानोपाय इति। अविप्लवः शुद्धिः सा च वासन
संशयविपर्ययानां परिहारेण विवेकसाक्षात्कारस्य स्वच्छप्रवाहेवस्थानं सा च विनादरनैरंतर्यदी र्घकालाभ्यासासे
विताभ्यासपरिपाकान्न भवतीति। दानेन विवेकख्यातेः कार्यैतासोपि संगृहीतः। सेयं विवेकसाक्षात्कारलक्षणा च
पंचमी सिद्धिः। सदामुदितमुच्यते तिस्रश्च मुख्याः सिद्धयः। प्रमोदमुदितमोदमानाऽऽख्यास्ताः सिद्धयः। अन्यैर्वीचिस्ते।
विनोपदेशादिना प्राग्भवीयाभ्यासवशात् तत्त्वस्य स्वयमूहनं यत्सा सिद्धिरूहः। यस्य सांख्यशास्त्रपाठमन्यदीयमा
कर्ण्य तत्त्वज्ञानमुत्पद्यते सा सिद्धिः शब्दः शब्दपाठानंतरभावित्वात्। यस्य शिष्याचार्यसंबंधमात्रेण सांख्यशा
स्त्रं ग्रंथतोर्थतश्चाधीत्य ज्ञानमुत्पद्यते। साध्ययनहेतुका सिद्धिरध्ययनं सुहृत्प्राप्तिरिति। यथाधिगततत्त्वं सुहृ
दं प्राप्य ज्ञानमुत्पद्यते सा ज्ञानलक्षणा सिद्धिः। तस्य सुहृत्प्राप्ति र्दानं च सि द्धिः हेतुर्वचनादिदानेनाराधि
तो ज्ञानी ज्ञानं प्रयच्छतीति तस्य मुख्यफले स्वैरिभिरेवापगंतव्ये इति चेन्न तं परदोषो ज्ञापनेमनसिधीनमा
त्रव्याख्यानप्रवृत्तानामिति सिद्धिस्तुष्टिविपर्ययेनाशक्तिर्बुद्धिवधः सप्तदशधा द्रष्टव्या। अत्र प्रत्ययसर्गे सिद्धि
रूपादेयेति। प्र सिद्धमेव तान्निराकरणे [illegible] योहेया इत्याह। सिद्धिः पूर्वोङ्कुशस्त्रिवि

राम
सां·टी
२५

धः पूर्व इति विपर्ययाशक्तितुष्टीः परामृशति ताः सिद्धिकरिणीनामंकुशाः निवारकत्वात् । अतः सिद्धेरपि परिपंथित्वादंकुशा इति चे
ति विपर्ययाशक्तितुष्टयो हेया इत्यर्थः । स्यादेतत् पुरुषार्थप्रयुक्ता सृष्टिः । स च पुरुषार्थः प्रत्ययसर्गाद्वा तन्मात्रसर्गाद्वा सि त्र
ध्यतीति । कृतमुभयसर्गेणेत्यत आह । न विना भावैर्लिंगं न विना लिंगेन भावनिर्वृत्तिः । लिंगाख्यो भावाख्यस्तस्माद्द्वि
विधः प्रवर्त्तते सर्गः । लिंगमिति तन्मात्रसर्गमुपलक्षयति । भावैरिति च प्रत्ययसर्गः । एतदुक्तं भवति । तन्मात्रसर्गस्यापि पुरुषा
र्थसाधनत्वं स्वरूपं च न प्रत्ययसर्गाद्विना भवति । एवं प्रत्ययसर्गस्य स्वरूपं च पुरुषार्थसाधनत्वं चेन्न तन्मात्राद्यत
दुभयथा सर्गप्रवृत्तिः । भोगः पुरुषार्थो न भोग्यान् शब्दादीन् भोगायतनं च शरीरद्वयमंतरेण संभवतीति । उपपन्न
स्तन्मात्रसर्ग एवं स एव भोगो भोगसाधनानींद्रियाणि चांतःकरणानि चांतरेण न संभवति । न च तानि धर्मादीन् भा
वान् विना । न चापवर्गहेतुर्विवेकख्यातिरुभयसर्गं विना इत्युपपन्नमुभयविधः सर्गः । अनादित्वाच्च बीजांकुरवत्
नान्योन्याश्रयदोषमावहति । कल्पादावपि प्राचीनकल्पोत्पन्नभावलिंगसंस्कारवशाद्भावलिंगयोरुत्पत्तिरनुप २
पन्नेति सर्वमवदातं । विनेताः प्रत्ययसर्गतन्मात्रसर्गं विभजते । अष्टविकल्पो दैवस्तैर्यग्योनश्च पंचविधो भवति ५
मानुष्यश्चैकविधः समासतो भौतिकः सर्गः । अष्टविधो दैवः सर्गः ब्राह्मः प्राजापत्यः ऐंद्रः पैत्रो गांधर्वो याक्ष
राक्षसः पैशाच इत्यष्टविधो दैवः सर्गः । तैर्यग्योनश्च पंचधा भवति । पशुमृगपक्षिसरीसृपस्थावराः ।

२५

मानुष्यश्चैकविधः ब्राह्मणाद्यवान्तरजातिभेदाविवक्षया संस्थानस्य चतुर्ष्वपि वर्णेष्वविशेषादिति समासतः संक्षेपः भौतिकः सर्गः।
घटादयस्तु शरीरत्वेपि स्थावर एवेति भौतिकस्य सर्गस्य चैतन्योत्कर्षनिकर्षतारतम्याभ्यां ऊर्ध्वाधोमध्यभावेन त्रैविध्यमाह। कू
ऊर्ध्वसत्त्वविशालस्तमोविशालश्च मूलतः सर्गः। मध्ये रजोविशालो ब्रह्मादिस्तम्बपर्यन्तः। ऊर्ध्वं सत्त्वविशालः ऊर्ध्वं भुवः द्युप्रभृतिस
त्यलोकान्तो लोकाः। सत्त्वबहुलस्तमोविशालश्च मूलतः सर्गः पश्वादिस्थावरान्तः सोऽयं मोहमयत्वात्तमोबहुलः भूर्लोकः सप्तद्वीपसन्निवे समु
शो मध्ये रजोविशालो धर्माधर्मानुष्ठानपरत्वात् दुःखबहुलसाधा। तां विभालोकसंस्थितिं संक्षिपति। ब्रह्मादिस्तम्बपर्यन्तः। स्तम्बश
ब्देन वृक्षादयः। न देवसर्गादिरचयित्वात् तस्यापवर्गसाधनं वैराग्यप्रयोजिनीं दुःखहेतुतामाह। तत्र जरामरणकृतं दुःखं प्राप्नोति
चेतनः पुरुषः। लिङ्गस्याविनिवृत्तेस्तस्माद्दुःखं स्वभावेन। यद्यपि विविधविचित्रानन्दभोगभागिनः प्राणभृद्भेदास्तथापि सर्वेषां
जरामरणकृतं दुःखमविशिष्टं सर्वस्य खल्वस्तु रूपमेव पि मरणमात्रासो मा न भूवं भूयासमित्येवमात्मकोऽस्ति। दुःखं च भयहे
तुरिति दुःखं मरणं स्यादेतत् तथापि सुखदुःखादयः प्राकृता बुद्धिगुणास्तत्कथमेते चेतनसंबन्धिनो भवन्तीत्यत आह। पुरुष इति।
न पुरि लिङ्गे शेते इति पुरुषः। लिङ्गं च तत्संबन्धीति चेतनोपि तत्संबन्धी भवतीत्यर्थः। कुतः पुनर्लिङ्गसंबन्धि दुःखं पुरुषस्याचे
तनस्येत्यत आह। लिङ्गस्याविनिवृत्तेः पुरुषाद्भेदाग्रहात् लिङ्गधर्मानात्मन्यध्यस्यति पुरुषः। अथवा दुःखं प्राप्नोत्येव
धिराज्यकथ्यते लिङ्गं। यावन्न विनिवर्तते तावदिति। उक्तस्य सर्गस्य कारणविप्रतिपत्तीर्निराकरोति इदं सेव

प्र(कृ)तिकृतो महदादिविशेषपर्यंतः। आरभ्यत इत्यारंभः। सर्गः प्रकृतेरेव कृतो नेश्वरेण न ब्रह्मोपादानो नाप्यकारण-
कः। अकारणत्वे ह्यत्यंतसत्ताभावो वा स्यात्। न ब्रह्मोपादानश्चितिशक्तेरपिपरिणामात्। नेश्वरा[...]धिष्ठि-
तप्रकृतिकृतो निर्व्यापारस्याधिष्ठितृत्वासंभवात्। नहि निर्व्यापारस्तक्षा वास्यादीनधितिष्ठति। ननु प्रकृति-
कृतश्चेत्तस्या नित्यायाः प्रवृत्तिशीलाया उपरमाभावात्सदैव सर्गः स्यादिति न कश्चन मुच्येतेत्यत आह। प्रतिपुरुष-
विमोक्षार्थं स्वार्थ इव परार्थ आरंभः। यथौदनकाम ओदनाय पाके प्रवृत्तः स ओदनसिद्धौ निवर्त्तते। एवं प्रत्येकं पुरुषा-
न्मोचयितुं प्रवृत्ता प्रकृतिर्यं पुरुषं मोचयति तं प्रति न पुनः प्रवर्त्तते तदिदमाह। स्वार्थ इव स्वार्थे यथा तथा परार्थे आ-
रंभ इत्यर्थः। स्यादेतत्। स्वार्थं परार्थं वा चेतनः सर्वं प्रवर्त्तते न च प्रकृतिरचेतना एवं भवितुमर्हति। तस्मादस्ति प्रकृतेरधिष्ठा-
ता ॥५६॥ चेतनः न च क्षेत्रज्ञाश्चेतना अपि प्रकृतिमधिष्ठातुमर्हंति तेषां प्रकृतिस्वरूपानभिज्ञत्वात् तस्मादस्ति सर्वा-
र्थदर्शी प्रकृतेरधिष्ठाता स ईश्वर इत्यत आह। वत्सविवृद्धिनिमित्तं क्षीरस्य यथा प्रवृत्तिरज्ञस्य पुरुषविमोक्षनिमित्तं
तथा प्रवृत्तिः प्रधानस्य। दृष्टमचेतनमपि प्रयोजनेन प्रवर्त्तमानं यथा वत्सविवृद्ध्यर्थं क्षीरमचेतनं प्रवर्त्तते एवं प्रकृ-
तिरचेतना पुरुषविमोक्षाय प्रवर्त्स्यति [illegible] धिष्ठानसिद्धि [illegible] न्तत्वेन। साध्यत्वात्। न साध्ये

व्यभिचार इति। सा च प्रेक्षावतः प्रवृत्तेः स्वार्थकारुण्याभ्यां व्याप्तत्वात्। ते च जगत्सर्गाद्व्यावर्तमाने प्रेक्षावत्प्रवृत्तिपूर्वकत्वमपि व्यावर्त-
यतः। न ह्यवाप्तसकलप्रेप्सितस्य भगवतः किमप्यभिलषितं भवति। नापि कारुण्यादस्य सर्गे प्रवृत्तिः प्राक्सर्गाद्वजीवानां
इंद्रियशरीरविषयानुत्पत्तौ दुःखाभावेन कस्य प्रहाणेच्छा। कारुण्यं सर्गोत्तरकालं दुःखिनोऽवलोक्य कारुण्याभ्युपगमे
दुस्तरमितरेतराश्रयं कारुण्येन सृष्टिः सृष्ट्या च कारुण्यमिति। अपि च कारुण्यप्रेरितः सुखिन एव जंतून् सृजेत्।
द्वैचित्र्य न विचित्रान्। कर्मवैचित्र्यमिति चेत्। कृतमस्य प्रेक्षावतः कर्माधिष्ठानेन। तदनधिष्ठानमात्रादेव शरीरेंद्रियविषयानुत्प-
त्तौ दुःखानुत्पत्तेः अतिसुकरत्वात्। प्रकृतेस्त्वचेतनायाः प्रवृत्तेः सुखानुग्रहो न कारुण्यं प्रयोजनमिति नोक्तदोषप्रसंगाव-
तारः। पारार्थ्यमात्रं तु प्रयोजनमुपपद्यते। तस्मात्सुष्ठूक्तं वत्सविवृद्धिनिमित्तमिति। स्वार्थ इवेति दृष्टांतितं तद्विभजते। औ-
त्सुक्यनिवृत्त्यर्थं यथा क्रियासु प्रवर्तते लोकः। औत्सुक्यमिच्छा सा खल्विष्टलाभात् प्राप्तौ निवर्तते। इष्यमाणः स्वार्थः
इष्टाःलक्षणत्वात्। न फलस्य पारार्थ्ये(?)जिके योजयति। पुरुषस्य विमोक्षणार्थं प्रवर्तते तद्वदव्यक्तं। ननु भवतु पुरुषा-
र्थः प्रवृत्तिः प्रवर्तको निवृत्तिस्तु कुतस्त्या प्रकृतेरिति। अत आह। रंगस्य दर्शयित्वा निवर्तते नर्तकी यथा नृत्यात्। पुरुषस्य
तथात्मानं प्रकाश्य निवर्तते। प्रकृतिः रंगस्येति। स्थानेन स्थानिनः पारिषदानुपलक्षयति। आत्मानं शब्दादिभ्यो भिन्ना-
च पुरुषाद्भेदेन प्रकाश्य संपादितः स्यादेव। प्रवर्तितां प्रकृतिः। पुरुषार्थं पुरुषादुपकृता सत्यपि निर्लज्जते। कंचिदुपका-
रं। अहो दुष्प्रकाशं वादानादाराय [illegible]

राम सां·दी
२७

दिवाक्षापयितुं भुंजिष्याः तां दिवाक्षापयितुं भुंजिष्याः न चाचन परार्थी स्वारंभ इत्यत आह। नानाविधैरुपायैरुप
कारिण्यनुपकारिणः पुंसः। गुणवत्यगुणस्य सतस्तस्यार्थमपार्थकं चरति। तथा गुणवाननुपकार्यपि भृत्यो निर्गुणमत ए
वानुपकारिणं स्वामिनं निःफलाराधनः एवमियं प्रकृतिः शीलं पवित्रनी गुणवत्युपकारिण्यनुपकारिणि
निर्गुणे पुरुषे अर्थे परिश्रमं न मेति पुरुषार्थमेव यतते न स्वार्थमिति सिद्धं। स्यादेतत्।
नर्तकीव सपरिषद्भ्यो दर्शयित्वा निवृत्तापि पुनस्तत्प्रसंगात् कुतूहलात् प्रवर्तते यथा तथा प्रकृतिरपि पुरुषायात्
त्मानं दर्शयित्वा निवृत्तापि पुनः प्रवर्त्स्यतीत्यत आह। प्रकृतेः सुकुमारतरं न किंचिदस्तीति मे मतिर्भवति। याद
ष्टास्मीति पुनर्दर्शनं नुपैति पुरुषस्य। सुकुमारतरा अतिपरावनतापरपुरुषदर्शनासहनेति यावत्। असूर्यंपश्या
हि कुलवधूरतिमंदाक्षमंथरा प्रमादादंगलिता सिचया चेदालोक्यते परपुरुषेण तदासौ तथा प्रयतते अप्रम
त्ता यथैनं भामिनी द्विः परपुरुषा न राज्ञिन पश्यंतीति। एवं प्रकृतिरपि कुलवधूतोप्यधिका दृष्टा विवेकेन पुनर्न द्रक्ष्य
ते इत्यर्थः। स्यादेतत्। पुरुषश्चेदगुणोऽपरिणामी कथमस्य मोक्षः। मुंचेर्बंधनविश्लेषार्थत्वात्। सवासनक्लेशा बा
कर्माशयानां च बंधनसंज्ञितानां पुरुषेऽपरिणामिन्यसंभवात्। अत एवास्य पुरुषस्य न संसारः प्रेत्यभावपर
भावापरनामास्ति निःक्रियत्वात्। तस्मात्पुरुषविमोक्षार्थमिति रिक्तं वचनमित्याशंकामुपसंहारव्याजेनाभ्युप रुक्ष·सू
२७

गच्छन्न काकरोति। तस्मान्न बध्यते नापि मुच्यते नापि संसरति कश्चित्। अतो न कश्चित्पुरुषो मुच्यत इति प्रकृतेरेव नानाश्रयास्सनी बध्यते च संसरति।
मुच्यते निबंधनामोक्षसंसाराः पुरुषे उपचर्यते यथा जयपराजयौ भृत्यगतावपि स्वामिन्युपचर्यते तेनैदासं- गोभृत्यानां तद्भा
गित्वात् तत्फलस्य शोकलाभादेः स्वामिनि संबंधात् भोगापवर्गयोः प्रकृतिगतयोरपि विवेकाग्रहात्पुरुषसंबंध उपपादित इति स
र्वं पुष्कलं नन्वेवं गतं प्रकृतिगता संबंध संसारमोक्षाः पुरुषे उपचर्यंत इति किंसाधनाः पुनरेते प्रकृतेर्नि साह। रूपैः
सप्तभिरेव तु बध्नात्यात्मानमात्मना प्रकृतिः। सैव च पुरुषार्थं प्रति विमोचयत्येकरूपेण। तत्त्वज्ञानवर्जं बध्नाति धर्मादिभिः
सकर्मीरूपैरिति। पुरुषार्थं प्रति भोगापवर्गं प्रति आत्मनात्मानं एकरूपेण तत्त्वज्ञानेन विवेकख्यात्या विमोचयति। पुनर्भोगाप
वर्गौ न करोतीत्यर्थः। अवगतमिदं तत्त्वं किमिति तत आह। एवं तत्त्वाभ्यासान्नास्मि न मे नाहमित्यपरिशेषं अविपर्यया
द्विशुद्धं केवलमुत्पद्यते ज्ञानं तत्त्वेन विविक्तिये न विषयितज्ञानमुपलक्ष्ये उक्तप्रकारतत्त्वविषयज्ञानाभ्यासादरनैरंतर्यदीर्घ
कालसेवितात्सत्त्वपुरुषान्यतासाक्षात्कारिज्ञानमुत्पद्यते यद्विषयाभ्यासस्तद्विषयमेव साक्षात्कारमुत्पादयति। तत्त्वविषयाभ्यासः इ
ति तत्त्वसाक्षात्कारं जनयति। अत उक्तं विशुद्धमिति। कुतो विशुद्धमत आह। अविपर्ययादिति। संशयविपर्ययौ ज्ञानस्याविशुद्धी तद्रहितं
पश्वा विशुद्धं तदिदमुक्तं। अविपर्ययादिति। निपतत्संनियततया रत्नसंशयो विपर्ययः तेन विपर्ययादिति। संशयविपर्ययाभावो
दर्शितः तत्त्वविषयत्वात्संशयविपर्ययाभावः स्यादेतत्। उत्पद्यतामीदृशाभ्यासात्तत्त्वज्ञानं तथापि अनादिना मिथ्याज्ञानसं

स्कारेण मिथ्याज्ञानसंस्कारेण मिथ्यानसंस्कारेण मिथ्याज्ञानं जनयितव्यं। तथा च ततश्च निर्बंधनस्य संसारस्यानुच्छेद इत्यसंगतस्तत उक्तं केव
लमिति। विपर्ययेणासंभिन्नं। यद्यपि अनादिविपर्ययासवासनातत्त्वज्ञानवासनया तत्त्वसाक्षात्कारं त्वादिमत्सापि रागद्यासमुच्छेत्तुं।
तत्त्वपक्षपातो हि धियां स्वभावः। यथाहुः धीह्याअपि निरुपद्रवभूतार्थस्वभावःस्य विपर्ययैः सबाध्यो यत्नवत्त्वेपि बुद्धेस्तत्पक्षपात
तो। ज्ञानस्वरूपमुक्तं। नास्मि न मे नाहमिति। नास्मीति आत्मनि क्रियामात्रं निषेधयति। यथाहुः भूभ्वस्तयः क्रियासामान्यवचना
इति। तस्माद्बाध्यवसायाभिमानसंकल्पालोचनानि बाह्यानि। बाह्यश्च सर्वो व्यापार आत्मनि प्रतिबिंबितानि बोद्धव्यानि यतश्चा
त्मनि व्यापारावेशो नास्ति। अतो नाहं। अहमिति कर्तृपदं। अहं जानामि अहं जुहोमि अहं ददे अहं भुंजे इति सर्वत्र कर्तुः परामर्शा
त्। किंपुनरेव सर्वत्र कर्तृत्वाभावस्ततः सुष्ठूक्तं नाहमिति। अत एव -- न मे कर्माहि स्वामित्वं लभते न इ भावात् कुतो भावि
कित्वामित्येसार्थः। अथवा नास्मीति पुरुषोस्मि पुरुषोस्मि न प्रसवधर्मत्वात् कर्तृत्वमाह। नाहमिति। अकर्तृत्वाच्च न स्वा
मित्वे साह। न मे इति। न चैतावत्तु ज्ञाने यद्यपि कश्चित् कदाचिद् दृष्टो विपर्ययोस्ति। तद्ज्ञानं तु नूनं बाध्यपदमीसत आह।
अपरिशेषमिति। नास्ति किंचिदस्मिन्नवशिष्टं ज्ञातव्यं यद्ज्ञानं बध्यति विपतीसर्थः। किंपुनर्नैवं ते दर्शनं तत्त्वसाक्षात्का
रेण सिध्यतीत्याह। तेन विनिवृत्तप्रसवार्थवशात्सप्तरूपविनिवृत्तां प्रकृतिं पश्यति पुरुषः। प्रेक्षकवदवस्थितः
[illegible] भोगविवेकसाक्षात्कारो हि प्रकृतेः प्रसवो तयोर्न च प्रसूताविति नास्याः प्रसानव्यमवशिष्यते। प्रसले
ष्पत इति। निवृत्तप्रसवा प्रकृतिः। विवेकख्यातिकर्तव्या।

तस्य वशः सामर्थ्यं तस्मादतत्त्वज्ञानपूर्वाणि खलु धर्माधर्मौ ज्ञानान वैराग्यावैराग्ये ऐश्वर्यानैश्वर्याणि वैराग्यमपि तौष्टिकानां
त अतत्त्वज्ञानपूर्वमेव तत्र तत्त्वज्ञानं विरोधित्वेनातत्त्वज्ञानमुच्छिनत्ति। कारणनिवृत्त्या च षड्रूपाणि निवर्त्तन्त इति स्वरूपनिवृत्ता
प्रकृतिः अवस्थित इति निःक्रियः। स्वस्थ इति रजस्तमोवृत्तिकलुषया बुद्ध्या असंभिन्नः। सात्विक्यातु वृत्त्यान इतदाप्यस्य
मनाक् संभेदोस्त्येव। अन्यथैवंभूतप्रकृतिदर्शनानुपपत्तेरिति स्यादेतत्। निवृत्तप्रसवामिति न मृष्यामहे। संयोग एवं कृतो
हि सर्ग इत्युक्तं योग्यता च संयोगः भोक्तृत्वयोग्यता च संयोगः। भोक्तृत्वयोग्यता च पुरुषस्य चैतन्यं भोग्यत्वयोग्यता च प्रकृते
र्जडत्वं विषयत्वं नन्वनयोरस्ति निवृत्तिः। न च कृतकरणीयाऽभावान्निवृत्तिः। नज्ञातानीर्थस्य न्यकरणीयत्वात्। पुनः पुनः शब्दा
द्युपभोगवदित्यत आह। दृष्टा मयेत्युपेक्षक एको दृष्टाहमित्युपरमत्यन्या सति संयोगेपि तयोः प्रयोजनं नास्ति सर्गस्य करोतु ना
मपेनः योग्येन शब्दाद्युपभोगं प्रकृतिः यया विवेकख्यातिः कृतेति। कृतविवेकख्यातिस्तु न शब्दाद्युपभोगं जनयति भ
विवेकख्यातिनिवंधनो हि तदुपभोगो न निवंधनाभावेन भवितुमर्हति। अंकुर इव बीजाभावे। प्राकृतान्हि सुखदुःखमोहा
त्मनः शब्दादीन्स्वदविवेकादेवात्मा सामदर्थ्ययमिभिमन्यतेऽउ सन्नविवेकख्यातिस्तु नद संसर्गाच्छब्दादीन्नोपभोक्तुमर्हती
ति नाप्यविवेकख्यातिं प्राकृतीं न तो विविक्तमात्मा स्वार्थमभिमंतुमर्हत्यपुरुषार्थौ च भोगे विवेकोपपन्नस्यारंभप्रयो
जकाविसपुरुषार्थौ संतो न प्रसूतिप्रयोजयंतः। नन्विदमुक्तं प्रयोजनं नास्ति सर्गस्य अत्र प्रयुज्यते न हि सर्गे प्रकृतिरनेनेति
प्रयोजनं नद पुरुषार्थत्वेनास्तीसर्थः। स्यादेतत् ... च्छेदनं नरमेव मुक्तः स्यादेतस्य शरीरपातः

राम
सां-टी
२९

स्यादिति कथं मे देहः प्रवृत्तिपर्येन्ता अपन्न तत्त्वज्ञानेऽपि न मुच्यते कर्मणामप्रक्षीणत्वात् तेषां कुतः प्रक्षयः भोगादिति चेत् योगसाध
नं न तत्त्वज्ञानं न मोक्षसाधनमिति । व्यक्ताव्यक्तज्ञविज्ञानजन्मा तत्त्वज्ञाने नापवर्ग इति रिक्तं वचः । भोगेनापरिसंख्येयपर कर्म
शयप्रचयो नियतविपाककालः क्षेतव्यः । ततश्चापवर्गप्राप्तेरिसपि मनोरथमात्रमित्यत आह । सम्यग्ज्ञानाधिगमाद्
धर्मादीनामकारणप्राप्तौ तिष्ठति संस्कारवशाच्चक्रभ्रमिवद्धृतशरीरः । तत्त्वसाक्षात्कारोदयादेवानादिरपि अनियत
परिपाकोऽपि कर्माशयप्रचयो दग्धबीजभावतया न जात्यायुर्भोगलक्षणाय फलाय कल्पते क्लेशसलिलावस
क्तायां हि बुद्धिभूमौ कर्मबीजान्यंकुरं प्रसुवते । तत्त्वज्ञाननिदाघनिपीतसकलक्लेशसलिलायामुखरायां कुतः कर्मबीजा
नामंकुरप्रसवः । तदिदमुक्तं धर्मादीनामकारणप्राप्ताविति । अकारणत्वप्राप्तावित्यर्थः । उत्पन्ने तत्त्वज्ञानेऽपि संस्का
रवशात्तिष्ठति । यथापरतेऽपि कुलालव्यापारे चक्रं वेगाख्यसंस्कारवशात् भ्रमन्तिष्ठति कालपरिणामादुपरते
संस्कारे ऽस्याच्चिरं पावन्न विमोक्षोऽपि संपत्स्यत इति च प्रक्षीयमानोऽविद्यासंस्कारशेषः संस्कारवशात् सामर्थ्याद्धृ
तशरीरस्तिष्ठति । स्यादेतत् । यदि संस्कारशेषादपि धृतशरीरस्तिष्ठति । कदास्य मोक्षो भविष्यतीत्यत आह । प्राप्ते शरीरभे
दे चरितार्थत्वात्प्रधानविनिवृत्तौ ऐकान्तिकमात्यन्तिकमुभयं कैवल्यमाप्नोति । अनारब्धविपाकानां तावत्कर्माशयानां त
त्त्वज्ञानाग्निना बीजभावो दग्धः । प्रारब्धविपाकानां तूपभोगेन क्षये सति प्राप्ते शरीरभेदे विनाशे चरितार्थत्वात्कृत
प्रयोजनत्वात्प्रधानस्य तं पुरुषं प्रति निवृत्तौ ऐकान्तिकमवश्यंभावि आत्यन्तिकमविनाशि इत्युभयं कैवल्यं दुःखत्रयवि

५ निष्क्रियं संभवति । शरीरस्थितौ च प्रारब्धपरिपाकौ धर्माधर्मौ संस्कारः पश्चाद्वा उपभुक्ते भोगे नानितरेक्षपायेत्ता । ६८
२९

गमं प्राप्नोति पुरुषः प्रमाणोपपादितेष्वसंतत्सु द्रोत्सादनोयपरमर्षिपूर्वक ह माह। पुरुषार्थज्ञानमिदं गुह्यं परमर्षिणा समाख्या
तं। गुह्यं तत्त्वकुद्धोत्सादनाय परमर्षिपूर्वकत्व महागुह्यानि चायिस्थूलाधिपां दुःखबोधमिति यावत्। परमर्षिणा कपिलेनना
मेव श्रद्धमागमिकत्वेन द्रढयति। स्थित्युत्पत्तिप्रलयश्चिंत्यंते यत्र भूतानां यत्र ज्ञानेन यदर्थमपथाचर्मलिहिपिनं हंति। भू
तानां स्थित्युत्पत्तिप्रलयाआगमे चिंत्यंते। स्यादेतत्। परमर्षिणा साक्षात्क थितं। न चेदृशी महितं तु नरीश्वरकृष्णे
न कथितं। तत्र कुतः श्रद्धेत्याह। एतत्पवित्रं पावनं दुःखत्रयपापमनः पुनातीति। अग्र्यं सर्वेभ्यः पवित्रेभ्यो मुख्यं मुनिः कपिलः।
आसुरयेनुकंपया प्रददौ आसुरिरपि पंचशि यायतेन च बहुधा कृतं तत्र शिष्यपरंपरयागतं। ईश्वरकृष्णेन चैतदाचार्याद्
तं भिः संक्षिप्तमार्यमतिना सम्यग्विज्ञानसिद्धांअराग्वनेतितेभ्यः इमार्यमाति यस्य सोयमार्यमतिमिति। एतत्का स्त्रं
सकलशास्त्रार्थसूचकत्वात् प्रकरणमित्याह। सप्तत्यां किल येर्थास्तेर्थाः कृत्स्नस्य षष्टितंत्रस्य। आख्यायि
काविरहिताः परवादेविवर्जितापि। तथा च राजवार्त्तिकी प्रमानास्तित्वमेथान्यता। पारार्थ्यं च तथानैक्यं वियोगो यो
ग एव। स्थितिर्निवृत्तिरकर्तृत्वं मौलिकार्थाः स्मृता दश। विपर्ययविविधः तथोक्ता नव तुष्टयः। करणानामसामर्थ्यमष्टावि कृतन
रातिधामतं। इति षष्टिपदार्थानामष्टभिः सह सिद्धिभिः। सेयं षष्टिपदार्थी कथितेति सकलशास्त्रार्थकथनान्ने
दं प्रकरणं। अपितु शास्त्रमेवेदमिति सिद्धं। एकत्वमर्थवत्त्वं च पारार्थ्यं च प्रधानमभिसोक्तं। अन्यत्वमकर्तृत्वं च
बहुत्वं चेति पुरुषमधिकृत्य। अस्ति संयोगो वियोगश्चेत्युभयमधिकृत्य। स्थितिरिति स्थूलसूक्ष्मशरीरमधिष्ठि

राम
सां·दी
३०

सा। मनांसि कुमुद्वतीव शोधयंती सततं सदा ६ ॥ ॥श्रीवाचस्पतिमिश्राणां रचिता तत्त्वकौमुदी समाप्ता ॥ ॥शुभमस्तु

ग्रंथसंख्या ॥ १०००



कृष्ण
३०